SRISTUTISUDARSANASTAKASODASAYUDHASTOTRANI

COLUMBIA LIBRARIES OFFSITE
CU11541679

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला-९७

श्रीमन्निगमान्तमहादेशिकविरचितानि

श्रीस्तुतिसुदर्शनाष्टकषोडशायुधस्तोत्राणि

(आत्रेयवरदाचार्यकृतव्याख्यासंवलिता श्रीस्तुतिः,
भारद्वाजराजगोपालाचार्यकृतव्याख्याविभूषिते
सुदर्शनाष्टकषोडशायुधस्तोत्रे)

सम्पादकः
आचार्यः का. इ. गोविन्दन्

AM 0462285 Code I-SAN-2008305448
13 COLUMBIA UNIVERSITY

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला-९७

श्रीमन्निगमान्तमहादेशिकविरचितानि

श्रीस्तुतिसुदर्शनाष्टकषोडशायुधस्तोत्राणि

(आत्रेयवरदाचार्यकृतव्याख्यासंवलिता श्रीस्तुतिः,
भारद्वाजराजगोपालाचार्यकृतव्याख्याविभूषिते
सुदर्शनाष्टकषोडशायुधस्तोत्रे)

सम्पादकः
आचार्यः का. इ. गोविन्दन्

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः (आं. प्र.)
२००३

64=00

प्रकाशक:

प्रो० डि० प्रह्लादाचार्य:
कुलपति:

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालय:)
तिरुपति: - ५१७५०७ (आं० प्र०)

प्रथमं संस्करणम् : २००३

मुद्रितपुस्तकानि : ५००
सर्वेऽधिकारा: विद्यापीठेन स्वायत्तीकृता:

offsite
BL
1228.26
.V46
2003g

मूल्यम्— 64 = 00

मुद्रक:—
अमरप्रिंटिंगप्रेस
८/२५ विजयनगर, दिल्ली - ११०००९

प्रो० डि. प्रह्लादाचार्य:
कुलपति:

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालय:)
तिरुपति: - 517 507

दिनाङ्क: 10-02-2003

आमुखम्

श्रीमन्निगमान्तदेशिकस्वामिभि: प्रणीतेषु उपत्रिंशत्स्तोत्रेषु श्रीस्तुति:, आत्रेयवरदाचार्यविरचितया व्याख्यया विभूषिता, सुदर्शनाष्टकं, षोडशायुधस्तोत्रमिति स्तोत्रद्वयं श्रीराजगोपालाचार्यविरचितव्याख्याभ्यां सहितमिदानीमस्मद्विद्यापीठात् प्रकाश्यन्त इति अपारस्यायं हर्षस्य विषय: ।

श्रीतत्त्वनिर्णयाय प्रवृत्तेयं श्रीस्तुति: श्रिय: स्वरूप-रूपगुणविभवैश्वर्याणि, चतुर्विधपुरुषार्थप्रदत्वादिकं च सम्यक् अभिष्टौति । अस्या: श्रीस्तुते: व्याख्यायां विविधा: शास्त्रीयविचारा: सम्प्रदायसम्बद्धाश्च विशेषा: सप्रमाणं प्रस्तूयन्ते ।

अष्टभि: पद्यै: सङ्गुम्फितस्य सुदर्शनाष्टकस्य श्रीमन्निगमान्तमहादेशिकप्रणीतस्य दृष्टादृष्टफलसाधकत्वं विद्यत इति आस्तिकै: विशेषत: श्रीमद्रामानुजाचार्यसम्प्रदायानुगामिभि: सश्रद्धं विश्वस्यते ।

काञ्चीनगरीमधिवसन्त: श्रीमद्वेदान्तदेशिका: भगवत: सुदर्शनस्य हस्ते विद्यमानानां षोडशानां चक्रादीनामायुधानां स्तुतिमकुर्वन् या च षोडशायुधस्तोत्रमिति नाम्ना भक्तजनै: प्रतिदिनं पापठ्यते । अनयोर्द्वयोरपि सुदर्शनाष्टकषोडशायुधस्तोत्रयो: तेन्बिरै इति विबुधजनाध्युषितेऽग्रहारे श्रोत्रियकुले कृतावतारा: श्रीराजगोपालाचार्यनामान: सुरभारत्या व्याख्ये अत्युत्कृष्टे अकार्षु: । ते इमे अत्र संयोज्य प्राकाश्यं नीयमाने स्त: ।

एतादृशान्यनुपमानि स्तोत्ररत्नानि श्लोकपादोद्धरणसूच्यादिनिर्माणद्वारा सम्पाद्य प्रकाशनाय समर्पितवद्भ्योऽस्मद्विद्यापीठीयन्यायविभागे आचार्येभ्य: श्रीमद्भ्य: प्रोफेसर् का. इ. गोविन्दन् महाभागेभ्य: धन्यवादान् व्याहृत्य, इतोऽप्यधिकसङ्ख्ययेदृशानि स्तोत्ररत्नानि ग्रन्थांश्च सम्पाद्य प्रकाशयितुं भगवान् तान् अनुगृह्णात्विति सम्प्रार्थ्य विरम्यते ।

प्रो.डि. प्रह्लादाचार्य:

64 = 00

श्री:

भूमिका

जयन्ति जगतां पत्युः जगद्रक्षणदीक्षिताः ।
मूर्ता इव दयापूरा अस्मदाचार्यपङ्क्तयः ॥

निषद्या विद्यानां निखिलकुमतिव्यालगरुडः
सभा सौभाग्यानां सरसकविता पद्मसविता ।
प्रमाणं भाष्यस्य प्रपदनकलाजन्मजलधिः
करोतु क्षेमं नः कविकथककण्ठीरवगुरुः ॥

नाथोपज्ञप्रवृत्ते यामुनेयप्रबन्धैर्बहुभिरुपचिते यतिपुरन्दरभगवद्भाष्यकारैः संयक् त्राते निखिलकुमतिव्यालगरुडैः श्रीमन्निगमान्तमहादेशिकैः प्रतिष्ठापिते विशिष्टाद्वैतवेदान्ते लब्धजन्मानः अनेके आचार्यवर्याः स्वस्वपुण्योपार्जितप्रतिभाशालिनः निजधिषणाऽनुसारं भगवद्गुणगणाननुभूयामन्दानन्दतुन्दिलेन वचसा यद्गायन्ति तदेव **स्तोत्र**मित्यामनन्ति अभियुक्ताः । उक्तं च **गुणिनिष्ठगुणकीर्तनं स्तोत्र**मिति । भगवद्गुणगणमहोदधिनिमग्नाचार्यचयेषु श्रीमन्निगमान्तमहादेशिका अनुपमं स्थानमावहन्तीत्यत्र तत्कृतोपत्रिंशत्स्तोत्राण्येव प्रमाणानि । तेषु स्तोत्रेषु श्रीलक्ष्मीविषयिका **श्रीस्तुतिः, सुदर्शनाष्टकम्, षोडशायुधस्तोत्र**मिति त्रीण्यन्तर्भूतानि ।

श्रीतत्त्वनिर्णयाय प्रवृत्तायां **श्रीस्तुतौ** प्रथमश्लोके श्रियः स्वरूप-रूप-गुण-विभव-ऐश्वर्याणि, द्वितीयतृतीययोः स्तोत्रारम्भसमर्थनम्, चतुर्थादादशमं लक्ष्म्याः स्वरूपम्, एकादशात् चतुर्दशान्तेषु दिव्यमङ्गलविग्रहवर्णनम्, पञ्चदशात् ऊनविंशत्यन्तेषु चतुर्विधपुरुषार्थप्रदत्वम्, विंशतितः चतुर्विंशत्यन्तेषु शरणागत्यनुष्ठानादिकम्, श्लोकेनान्तिमेन फलश्रुतिश्च इत्यनेके विषयाः प्रतिपादिताः । स्तोत्रमिदं श्रीरङ्गे कृतमिति केचित्, केचित् काञ्चीनगर्यामिति ब्रुवन्ति । श्रीस्वामिनि काञ्चीनगरीमधिवसति सति तत्र स्वविवाहापेक्षितार्थयाचनार्थमागतस्य कस्यचित् विप्रवटोरिच्छापूर्तये श्रीदेवराजमन्दिरे श्रीमहादेव्याः संनिधौ स्तोत्रस्यास्यानुसन्धानं कृतम् । तत्र

योगारम्भत्वरितमनसः (श्लो. १६) इति श्लोकानुसन्धानावसरे आकाशात् स्वर्णवृष्टिरभूत् इति इतिहासविदो वदन्ति ।

स्तोत्रस्यास्यैका व्याख्या **आत्रेयवरदाचार्यैः** विनिर्मिता संप्रति प्रकाश्यते । इमे चात्रेयगोत्रोत्पन्ना वरदाचार्याः कं देशं विभूषयामासुः ? कौ वा पितरौ ? कस्य शिष्याः ? कति कृतयः इत्यादीनां विषये किमपि स्पष्टं प्रमाणं नोपलभ्यते यद्यपि, तथापि श्रीस्तुतिव्याख्योपक्रमे[१] स्वनामभिन्नात्रेयवरदाचार्य-श्रीनिवासाचार्यसंबन्धी, तत्कुलदैवतं भूवराह इति अन्ते च[२] अग्रजो सुन्दराचार्यः संप्रदायोपदेशक इति च दर्शनात् सुन्दराचार्यस्य शिष्य इति निश्चीयते ।

किं च[३] १७०० हूणहायने लब्धजन्मनां विरचितानेकसंप्रदायवेदान्तधर्मशास्त्रग्रन्थानां 'तिरुक्कुडन्दै देशिकन्' इति नाम्ना प्रथितानां श्रीमद्गोपालार्यमहादेशिकानां पितामहगोष्ठ्यामन्तर्भूता इमे[४] श्रीस्तुतिव्याख्यातार इति कथनात् पितामहकोटावन्तर्भूतत्वात् न्यूनान्न्यूनतरं श्रीमद्गोपालार्यमहादेशिकात् पञ्चाशद्वयोभिः ज्येष्ठा भवेयुरिति सप्तदशशतकस्य मध्ये वा ततः पूर्वं वा जीवनकाल एतेषां आत्रेयवरदाचार्याणां भवेदिति अभ्यूहितुं शक्यते ।

प्रकृतस्तोत्रव्याख्यातुः वरदाचार्यस्य शास्त्रे संप्रदाये च कीदृशं गभीरं ज्ञानमस्तीत्यत्र कानिचन स्थलानि प्रस्तौमि—'**यत्संकल्पादि**'ति[५] तुरीयश्लोके जगत्कारणं पुरुषोत्तमः श्रीमन्नारायणः इत्यत्र लक्ष्मीपतित्वमेव लिङ्गमिति सप्रमाणं निरूपितम् । तदवसरे '**भवतीपादलाक्षारसाङ्कम्**' इत्यत्र भवतीशब्दस्य सर्वनामत्वेन

---

१. आत्रेयं वरदाचार्यं श्रीनिवासार्यशेखरम् ।
वेदान्तार्यं यतीन्द्रं च शठारिं च रमां क्षमाम् ॥
वासुदेवं कुलधनं भूवराहं प्रणम्य च ॥ (पृ. १)

२. बालस्य मेऽग्रजो भ्राता पितामह इवापरः ।
सारज्ञः सुन्दराचार्यः संप्रदायानुपादिशत् ॥ (पृ. ३९)

३. अम्मासत्रं चतुश्शास्त्रवेदकल्पतरुशेषाचार्यस्वामिरचितमुनित्रयगुरुपरम्पराप्रभावे (पृ. ३०)

४. महामहोपाध्यायश्रीवत्साङ्काचार्यैरुक्तम् ।

५. पृ.८

सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भाव इति भवत्पादलाक्षेति स्यादित्याक्षिप्य 'एकोऽहं भवतीसुतक्षयकर[१]' इति महाकविभट्टनारायणकृतवेणीसंहारोक्तिम्, 'भवतीसंबन्धदृष्ट्या हरिम्[२]' इति पदशास्त्रमर्मज्ञपराशरभट्टविरचितश्रीगुणरत्नकोशोक्तिं च प्रदर्श्य भवच्छब्दस्य सर्वनामभिन्नस्य शतृप्रत्ययान्तस्य संभावितत्वात् । अन्यथा गत्यन्तराभावादिति समर्थितम् ।

'निष्प्रत्यूहप्रणयघटितम्[३]' इति पञ्चमश्लोके जगत्कर्तृभगवदनुमन्तृत्वेन वा प्रेरकत्वेन वा श्रियः जगत्कर्तृकोटावन्तर्भावे ईश्वरद्वित्वापत्तिरित्याशङ्क्य श्रुत्याद्यनेकप्रमाणैः लक्ष्मीविशिष्टस्यैव ईश्वरत्वमिति व्यवस्थापितम् ।

'त्वामेवाहुः[४]' इति नवमपद्ये श्रियः अणुत्वं, जीवकोटावन्तर्भूतत्वम्, उपायदशायामनन्वयत्वमित्यादि पक्षाननूद्य सप्रमाणं निराकृत्य विभुत्वम्, ईश्वरत्वमित्यादिकं प्रतिष्ठापितम् ।

आत्रेयवरदाचार्याणां कृतिषु **श्रीस्तुतिव्याख्या, कारिकादर्पणव्याख्येति** ग्रन्थद्वयं संप्रति अस्मद्दृष्टिपथमवतरति । कारिकादर्पणव्याख्याख्योऽयं ग्रन्थः श्रीमन्निगमान्तमहादेशिकैरनुगृहीते रहस्यत्रयसारनामकमणिप्रवालग्रन्थे तत्र तत्रोक्तबह्वर्थगर्भितकारिकाणां व्याख्याभूतः बहुवर्षेभ्यः प्राक् ग्रन्थ-तेलुगुलिप्योः मुद्रितः । अस्योद्धारः श्रीमद्गोपालार्यमहादेशिकैः[५] स्वकृताह्निकग्रन्थे कृतः ।

वरदाचार्यकृतव्याख्योपेतस्यास्य स्तोत्रस्य बहोः[६] कालात् प्राक् ग्रन्थलिप्यां मुद्रितस्य प्रथमवारं देवनागरिलिप्यां मुद्राप्य प्रकाश्यते ।

---

१. पञ्चमेऽङ्के नवमश्लोकः ।

२. श्लो.५२

३. पृ.११

४. पृ.२१

५. 'कारिकादर्पणोक्तक्रमेण निगमान्तदेशिकोक्तं मन्त्रार्थमपि चिन्तयन् यथाशक्ति मूलमन्त्रं जपेत्' इत्यष्टाक्षरमन्त्रजपप्रकरणे उक्तम् । (पृ. ३७)

६. कुम्भघोणस्थगोपालविलासमुद्रणालये१९११ वत्सरे मार्चमासे प्रकाशितम् ।

सुदर्शनाष्टकमिदं स्तोत्रमष्टभिः पद्यैः गुम्फितम् । सर्वत्रान्तिमचरणः समानः ।
प्रतिपादं पदानि संबुद्ध्यन्तानि । संबुद्ध्यन्तपदैरेव श्रीहेतिराजस्य प्रभावाः
ख्यापिताः ।

श्रीमन्निगमान्तमहादेशिकैः कदाचित् गृध्रसरस्तीरे[१] निवसतां सतां शीत-
ज्वरविनाशाय रणपुङ्गवदेव[२]संनिधौ दृष्टादृष्टफलसाधकं स्तोत्रमिदं कृतमिति प्रथम-
श्लोकावतारिकातः[३] स्पष्टं ज्ञायते । स्तोत्रमिदं द्विरभ्यस्तनगणतगणभगणात्मके
धृतिच्छन्दसि[४] निबद्धम् । काञ्चीनगर्यां कृतं स्तोत्रमिदं **सुदर्शनाष्टक**मिति वैभवप्र-
काशिकाकारै[५]रभिहितम् ।

काञ्चीनगरीमधिवसन्तः श्रीमद्वेदान्तदेशिकाः जातु गृध्रसरस्तीरनिवासिसा-
धुजनसुदुस्सहशीतज्वरनिवृत्तये **सुदर्शनाष्टकं** विरचय्य, पुनरपि तस्यैव सुदर्शनस्य
हस्ते विद्यमानानां षोडशानां चक्रादीनामायुधानां स्तुतिमकुर्वन् इति प्रथमपद्यावता-
रिकया[६] स्पष्टम् । अत्र प्रथमम् उपोद्घातरूपेण पद्यद्वयं, एकैकस्याप्यायुधस्य वर्ण-
नपरं पद्यमेकमिति षोडश, फलश्रुतिरूपमेकमित्याहत्योनविंशतिश्लोकैः ग्रथितमिदं
षोडशायुधस्तोत्रम् ।

द्वयोरप्यनयोः स्तवयोः चम्पकारण्यक्षेत्रमिति प्रसिद्धस्य 'मन्नार्गुडि' नामक-
लघुनगरस्यानतिदूरे 'तेन्बिरै[७]' इति विबुधजनाध्युषितेऽग्रहारे श्रोत्रियकुले भारद्वा-
जगोत्रे कृतावताराः राजगोपालाचार्यनामानः द्रविडभाषानभिज्ञानामनायासेनार्था-
वगमनाय सुरभारत्यां व्याख्यामत्युत्तमामकार्षुः ।

---

१. 'तिरुप्पुट्कुलि' इति ग्रामनाम ।
२. तत्र मन्दिरे विराजमानस्य देवस्य विजयराघव इति नाम ।
३. पृ.२.
४. पृ.३
५. पृ.३६
६. पृ.११
७. तेन्बिरै राजगोपालाचार्येण... । इति पुष्पिका (पृ.९ and २२)

एतेषां जनकविषयकप्रमाणानुपलम्भेऽपि स्वाचार्यविषयकप्रमाणं
स्वयमेव[१] स्तोत्रयोरुभयोरादावन्ते च प्रदर्शयन्ति । तेन सिद्धं वेदान्तरामानुजमुनयः
एतेषामाचार्याः इति । इमे च वेदान्तरामानुजमुनयः तारणवर्षे मार्गशीर्षमासे स्वाती-
नक्षत्रे नावल्पाकाग्रहारे शठमर्षणगोत्रश्रीरामानुजाचार्याणां पुत्रत्वेनावतीर्य, तद्ग्राम-
वास्तव्यानां निजज्ञातीनां श्रीमदण्णयार्यमहादेशिकानां सकाशात् समग्रमपि
न्यायवेदान्तादिशास्त्रमधिगम्य केताण्डिपट्टिस्वामिनाम्ना प्रथितानां यतीश्वराणाम-
नुग्रहेण तुरीयाश्रमं प्राप्यानेकान् सच्छिष्यान् वलयपेट्टैस्वामिनाम्ना प्रथितान् श्रीनि-
वासाचार्यस्वामिनः, अम्मासत्रं चतुश्शास्त्रवेदकल्पतरुशेषाचार्यस्वामिनः,
अध्यापयन्तः त्रिंशच्चातुर्मास्यान् अनुतिष्ठन्तः कुम्भघोणे कावेरीतटमधिवसन्तः
स्वीयपञ्चाशीतितमवयसि श्रीवैकुण्ठमधिजग्मुः । तादृशानामेतेषामाचार्यचरमाणां
शिष्यत्वात् इमे राजगोपालाचार्याः गतशतकस्य पूर्वभागं यावत् स्थिता इति वक्तुं
शक्यते । एतैः रघुवीरगद्य-गरुडदण्डकाद्यनेकेषां स्तोत्राणामपि व्याख्या कृता ।
समयान्तरे तासामपि प्रकाशनं भगवदनुग्रहेण भवेदिति विश्वसिमि ।

स्तोत्रयोरनयोरपि व्याख्येयं बहोः कालात् प्राक् ग्रन्थलिप्यां मुद्रिता । अद्य
प्रथमवारं देवनागरिलिप्या प्रकाश्यते । सव्याख्यानानामेतेषां त्रयाणामपि स्तोत्राणां
प्रकाशनायानुमतिं दत्तवद्भ्यः सुरभारतीसमुपासकेभ्यः एतद्विद्यापीठकुलाधिप-
तिभ्यः डॉ. वादिराजपञ्चमुखीमहाशयेभ्यः, न्यायवेदान्ताद्यनेकविद्यानिपुणेभ्यः
एतद्विद्यापीठकुलपतिवर्येभ्यः आचार्य-प्रह्लादाचार्येभ्यश्च कार्तज्ञ्यं विनिवेद्यात्मानं
धन्यं मन्यमानः

विषु-फाल्गुन-कृष्णचतुर्दशी
११.४.२००२

विबुधजनविधेयः
का.इ.गोविन्दन्

---

१. पर्यायभाष्यकारं प्रणतार्तिहरं प्रसन्नवदनाब्जम् ।
शान्तं सद्गुणवार्द्धिं श्रयामि वेदान्तलक्ष्मणार्यमुनिम् ॥ (सुदर्शनाष्टके पृ.१)
वेदान्तलक्ष्मणमुनिर्वेदान्तविशदाशयः ।
अङ्गीकरोतु दासोक्तिमर्भकोक्तिमिवाविलाम् ॥ (सुदर्शनाष्टके पृ.९)
वेदान्तलक्ष्मणमुनेः पादाम्बुरुहरेणुना ।
विवृता राजगोपेन षोडशायुधसंस्तुतिः ॥ (षोडशायुधस्तोत्रे पृ.२२)

विषयानुक्रमणिका

आमुखम्	*iii*
भूमिका	*v-ix*
श्रीमन्निगमान्तमहादेशिककृता श्रीस्तुतिः (आत्रेयवरदाचार्यकृतव्याख्यया विभूषिता)	१-३९
श्रीस्तुतिश्लोकपादसूची	४०-४४
श्रीस्तुतिव्याख्याया प्रमाणतयोद्धृतानां ग्रन्थतत्कर्तृवचनानां सूची	४५-५८
श्रीमन्निगमान्तमहादेशिककृतं सुदर्शनाष्टकम् (भारद्वाजराजगोपालाचार्यकृतव्याख्यासहितम्)	१-९
निगमान्तमहादेशिकविरचितं षोडशायुधस्तोत्रम् (भारद्वाजराजगोपालाचार्यकृतव्याख्यासहितम्)	१०-२२
सुदर्शनाष्टकश्लोकपादसूची	२३-२५
सुदर्शनाष्टकव्याख्यायां प्रमाणतयोद्धृतानां ग्रन्थतत्कर्तृवचनानां सूची	२६-२७
षोडशायुधस्तोत्रश्लोकपादसूची	२८-३१
षोडशायुधस्तोत्रव्याख्याने प्रमाणतयोद्धृतानां ग्रन्थतत्कर्तृवचनानां सूची	३२-३५

श्रीः

श्रीमते हयवदनपरब्रह्मणे नमः

श्रीमन्निगमान्तमहादेशिकविरचिता श्रीस्तुतिः

आत्रेयवरदाचार्यप्रणीतव्याख्योपेता ।

आत्रेयं वरदाचार्यं श्रीनिवासार्यशेखरम् ।
वेदान्तार्यं यतीन्द्रं च शठारिं च रमां क्षमाम् ॥
वासुदेवं कुलधनं भूवराहं प्रणम्य च ।
करिष्ये श्रीस्तवव्याख्यां बालानां बोधसिद्धये ॥

इह खलु सकलजगदुज्जीवनाय कलिविलसितकुमतिमतशतनिरसनाय च समुदितः श्रीनिवासघण्टावतारतया प्रसिद्धः सर्वतन्त्रस्वतन्त्रो भगवान् वेदान्ताचार्यः भक्त्युपायानधिकारिणामुज्जीवनाय प्रपत्त्युपायानुष्ठानं सप्रकारं प्रबन्धान्तरेषु बहुशः प्रतिपाद्य तत्र पुरुषकारतया भगवता **भाष्यकारेण** गद्यादौ **'भगवन्नारायणे**(श.ग.)'त्यादिना दर्शितां श्रीशरणागतिं, तन्मध्ये श्रीगद्यं च **'असंख्येयकल्याणगुणश्रीवल्लभे**(श.ग.)'त्यादिना गद्यान्तरे श्रीविशिष्टशरणागतिं च द्वयमपि विशदीकर्तुं लोकमातुः विष्णुपत्न्याः जीवत्वाणुत्वाद्यभ्युपगमेन निष्कर्षमिच्छतां पक्षान् विक्षोभयितुं पुरुषकारत्व-शरण्यत्व-उपेयत्वौपयिकान् गुणांश्च प्रकटयितुं स्तुतिव्याजेन दिव्यप्रबन्धम् आरभते—

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षः पीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयो मूर्तिं श्रियमशरणः त्वां शरण्यां प्रपद्ये ॥ १ ॥

मानातीतेत्यादि । अत्र श्लोके, **'त्वां शरण्यां प्रपद्ये'** इति क्रियामाणेन श्रीप्रपदनेनैव निर्विघ्नपरिसमाप्तिफलकशिष्टाचारप्राप्तमङ्गलानुष्ठानमपि सेत्स्वतीति प्रथमं मङ्गलानुष्ठानं न कृतम् । अत एव **'मङ्गलं मङ्गलानाम्',** इति स्वाभिप्रायः सूचितः । न च काम्यकर्मतया तत् प्रपन्नैरनादरणीयमिति वाच्यम् । एतादृशप्रब-

न्धानां सकल-जगदुज्जीवनतया तत्समाप्तेः तदभिवृद्धेश्च '**सत्समृद्धिं च युक्ताम् नित्यं याचेऽनन्य**' इति न्यायेन प्रार्थनीयत्वात् पूर्वाचार्यैः स्वस्वग्रन्थादावनुष्ठितत्वाच्च न चोद्यावकाश इति ध्येयम् । अत्र च श्रीः देवी स्वस्वरूपरूपगुणविभवैश्वर्यविशिष्टा प्रतिपाद्येति सैव प्रबन्धस्य विषयः । प्रयोजनं च तत्तत्कामकामानामशक्ताधिकारिणां श्रीप्रपदनद्वारा सर्वकामसिद्धिः । तत्राद्यश्लोके देव्याः स्वरूपादिपञ्चकं संग्रहेणाभिधाय, अनन्तकल्याणगुणतया देव्याः स्तुतिरेव न शक्येत्याशयं द्वितीयश्लोके दर्शयित्वा पुनः स्तोत्रारम्भाशंसामात्रेण प्रसन्ना सती स्तवनफलं ददातीति तृतीये समाधाय, **यत्सङ्कल्पादि**'त्यादिश्लोकैः सप्तभिः स्वरूपं प्रकाश्य, एवं विधामम्बां विग्रहवतीं चतुर्भिः श्लोकैः प्रतिपाद्य, तदनु पञ्चभिः

'**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च**(७-१६)' इति **गीतोक्त**पुमर्थचतुष्टयप्रदातृत्वविवरणमुखेन देव्याः कल्याणगुणेष्वभ्यर्हिततमम् औदार्यं प्रतिपाद्य, औदार्याविनाभूतान् परमकारुणिकत्ववात्सल्यसौशील्यादिगुणान् सूचयित्वा, विभवैश्वर्ययोरप्येतेनैव सिद्धवत्कारेण पृथगनभिधेयत्वात्, ततः पञ्चभिः श्लोकैः स्वाभीष्टं विज्ञाप्य फलश्रुत्या निगमयत्याचार्य इति सर्वोऽप्ययं प्रबन्धः श्रीतत्त्वनिर्णयाय प्रवर्तत इति द्रष्टव्यम् ।

तत्र प्रथमश्लोके श्रीशब्दार्थपर्यालोचनया श्रीङ्धातुद्योतितां पुरुषकारशरणागतिं, मतुबर्थनित्ययोगसूचितां प्रपत्तव्यत्वाविनाभावसिद्धां मोक्षार्थशरणागतिं च संगृह्याह । तथा हि-**अशरणः** उपायान्तरेषु भक्त्यादिष्वशक्तः

'**उपाये गृहरक्षित्रोः शब्दः शरणमित्ययम् ।**
वर्तते सांप्रतं त्वेष उपायार्थैकवाचकः ॥' (अहि.सं ३७-३१)

इत्यभिधानात् । अत्र '**अहमस्म्यपराधानामालयोऽकिंचनोऽगतिः**(अहि.सं.३७-३०)' '**अकिंचनोऽनन्यगतिश्शरण्य**(स्तो.र.२२)' इत्यादावुक्तम् अनन्यगतिकत्वम् अनन्योपायत्वापरपर्यायं सूचितं मोक्षार्थशरणागताविति द्रष्टव्यम् । एतेन प्रपत्त्यधिकारो दर्शितः । अहमित्यनेनाध्याहृतेन विशेष्येण प्रपदनाङ्गं कार्पण्यं द्योत्यते । **श्रियं त्वां प्रपद्य** इत्यत्र शरणमित्यध्याहार्यम् अशरण इत्युक्तिसामर्थ्यात् । पदगतावित्यस्य गत्यर्थकतया बुद्ध्यर्थकस्य प्रोपसर्गयोगेन विश्वास-

रूपप्रकृष्टज्ञानतात्पर्यतया महाविश्वासो दर्शितः । अत्राध्याहृतशरणशब्दोपश्लिष्टधातुना उपायान्तरस्थाननिवेशरूपो भरन्यासो दर्शितः । उपायत्वप्रार्थनात्मकत्वात् गोप्तृत्ववरणमप्यन्तर्नीतम् । एवमितराण्यप्यङ्गानि अर्थादाक्षिप्तान्यनुसन्धेयानि । न हि कश्चिदन्यत्र स्वद्रव्यं न्यस्यन् तदनुकूलतामन्तरेण वर्तितुं संकल्पयति । न तावत्प्रातिकूल्येन । **शरण्याम्** शरणमर्हतीति अर्हार्थे यत्प्रत्ययः । तदर्हत्वं च कारुणिकत्वरक्षासामर्थ्याभ्यामिति तदुभयविवरणाय विशेषणानि **मानातीते**त्यादीनि । **मानातीतप्रथितविभवाम्** मानं प्रमाणं शब्दादिकमतीतः, द्वितीयाश्रितेति समासः । '**यतो वाचो निवर्तन्ते**'(तै.उ.) इति वाङ्मनसाऽपरिच्छेद्यः । यद्वा मानं परिमाणम् असंख्येयमित्यर्थः । असतोऽप्यसंख्येयतया तद्व्यावृत्तिमाह-**प्रथिते**ति । प्रथितः प्रमाणप्रसिद्धः, विभवः विभूतिः यस्याः ताम्, सकलविभूतिनायकत्वं पत्युरिवास्या अपि इति बोध्यम् । अत्र च प्रमाणमुपरिष्टात् दर्शयिष्यते । अत ईश्वरत्वात् रक्षासामर्थ्यं समर्थितम् । ननु—

'**पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।**

दैवतं देवतानां च' इति भारतोक्तं सर्वेश्वरलक्षणमत्रापि स्यात् । न चैवमुपलभ्यत इत्याशङ्कायां पृथग्वचनानुपलम्भेऽपि तस्या ईश्वरत्वाविशेषात् भारतवचनमप्युभयपरमित्याशयादाह—**मङ्गलं मङ्गलानामि**ति । वस्तुतस्तु लक्ष्मीसहस्रनाममध्ये-'**सर्वमङ्गलमाङ्गल्या सर्वकामफलप्रदा** । (ल.स.श्लो. १३३)

सर्वानन्दा सदानन्दा (ल.स.श्लो.)' इति । पवित्राणां गङ्गोदककुशपवित्रद्रव्याणां पावनत्वं यत्संकल्पवशात् तथा मङ्गलानां शोभनद्रव्याणां दधिदूर्वाक्षतादीनामुत्सवानां च मङ्गलत्वं यत्संकल्पायत्तं तस्य दिव्यवस्तुनः पवित्रत्वमङ्गलत्वयोः कैमुत्यन्यायसिद्धत्वात् **मङ्गलानामि**ति निर्धारणषष्ठ्या मङ्गलतमत्वं विवक्षितम् । एवं देव्या ईश्वरत्वसिद्ध्या तदाक्षिप्तजगत्कारणत्वजगद्व्यापारादिसिद्ध्या जीवादिव्यावृत्तिरित्युक्तं भवति । अथ रूपमाह—**वक्षः पीठी**मित्यादिना । **मधुविजयिन** इति । मधुविजयी '**जिद्दृक्षिविश्रि**' इति इनिः । पीठी वक्ष इत्युपमितिसमासः । **स्वकान्त्या भूषयन्तीम्** तेन मुकुन्दवक्षस्स्थलभूषणायमानदिव्यमङ्गलविग्रहविशिष्टत्वं स्फोरितम् । '**श्रियः श्रियं भक्तजनैकजीवितम्**(स्तो.र.३९)' '**सदा तवैवोचि-**

तया तव श्रिया (स्तो.र. ३८)' इति द्वयोरपि परस्परशोभाजनकत्वे तुल्येऽपि '**अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा** (रा.आ.३७-१८)' इति भगवतो निरतिशयदीप्त्यावहस्वसंबन्धत्वात् देव्या एव तदसाधारणमित्यभिसन्धिः। अथ गुणान् **श्रियमिति** पदेन संग्रहीष्यन् '**श्रियं लोके देवजुष्टामुदाराम्** (श्री.सू.५)' इति श्रुतिप्रतिपन्नस्य '**त्वं लज्जसे कथय कोयमुदारभावः** (श्री.गु. श्लो. ५८)' इति पूर्वाचार्यविवृतस्यौदार्यस्य परमकारुणिकत्वप्रयुक्तस्य प्राधान्येन पृथक् प्रतिपादनमुचितमित्याशयादाह-**प्रत्यक्षेति**। प्रत्यक्षप्रमाणसिद्ध ऐहलौकिकः पशुपुत्रादिसमृद्धिरूपो महिमा। अनुश्रवः वेदः '**निगमानुश्रवावपि**' इति शब्दार्णवे। तत्र भवः आनुश्रविकः '**अध्यात्मादित्वात् ठञ् (सि.कौ.पृ. २६०)** । वैदिकः स्वर्गकैवल्यापवर्गरूपो महिमा च, तौ महिमानौ प्रार्थयन्त इति तत्प्रार्थिन्यः तासां प्रजानामिति मातृत्वस्फूर्तिः। अतः प्रजासु वत्सलत्वं च ध्वनितमिति वस्तुना वस्तुध्वनिः। **श्रेयो मूर्तिम्** श्रेयो रूपां श्रेयस्साधनत्वात् तथोपचारः। द्विविधश्रेयस्साधनत्वे देव्याः किं मानम्? उच्यते—

'यज्ञविद्या महाविद्या गुह्यविद्या च शोभने।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी॥'

(वि.पु. १-९-१२०)

इति **विष्णुपुराण**वचनात्। विमुक्तिफलदायिनीत्यस्य आत्मविद्याविशेषणस्याभिहितत्वात् देव्यास्तदुपायात्मकत्वम्, विमुक्तिफलदायिनी त्वमात्मविद्येत्यन्वयाश्रयणे कैवल्यसाधनयोगविद्यारूपत्वम्। यद्वा '**मेधा श्रद्धा सरस्वती** (वि.पु. १-९-११९)' त्यत्र मेधाशब्देन तावत् क्रोडीकारः। इदमेव हि श्रेयोरूपत्वम्—

'श्रेयो न ह्यरविन्दलोचनमनः कान्ताप्रसादादृते
संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित्।'

(च. श्लो. ३)

इति कण्ठत उक्तं यामुनाचार्यैः। परमोदारत्वस्य परमकारुणिकत्वप्रयुक्तस्याक्षिप्तत्वात् तदपि स्फुटीकृतम्। एवं पूर्वार्धे रक्षासमर्थत्वस्य उत्तरार्धे परमकारुणिकत्वस्य चार्थतः प्रकटनात् शरण्याम् इत्युक्तिरुपपन्ना। स्वरूपरूपनिरूपणा-

नन्तरं गुणान् निरूपयति—**श्रियम्** इति। 'गुणात् रूपगुणाच्चापि' (रा.बा.७७-२९) इति रामायणोक्तप्रकारेण गुणाः द्विविधाः रूपगुणा आत्मगुणाश्चेति। आद्याः कान्त्यादयः भूषयन्तीं स्वकान्त्या इत्यादावेव लेशतः सूचिताः श्रीब्देन प्रतिबोध्यन्ते, 'कान्तिर्लावण्यमर्चिः' (श्रीगुण- ३२) इत्यादिगुणगणसमावेशेन वपुषो दीप्तिरेव श्रीरिति द्रष्टव्यम्। शृण्वतीं श्राव्यन्तीमाश्रितानां करुणाक्रन्दनं भगवन्तमिति, '**श्रयते च परं पदम्**' इत्यादिव्युत्पत्तिभिः पुरुषकारत्वोपयुक्तदयाद्र्त्वक्षमाशालित्वदोषादर्शित्वपतिवाल्लभ्यतत्तद्रञ्जनसमर्थत्वार्जवमार्दवसौहार्दस्थिरत्वसमत्वादयोऽस्या आत्मगुणाश्च स्फोरिताः। 'श्रीयते चाखिलैर्नित्यम्' (अहि-सं- ५१-६२)

'श्रिणाति निखिलान् दोषान् शृणाति च गुणैर्जगत्'

(अहि-सं- ५१-६२)

इत्यादिव्युत्पत्तिभिः सिद्धोपायत्वौपयिकाः समाश्रयणविरोधिरजस्तमोनिवर्तकत्वसमाश्रयणोत्तरभाविसकलसांसारिकदोषनिवर्तकत्वसमाश्रयणोत्तरभाविसमाश्रयणौपयिकज्ञानविशेषपरिपाकादिहेतुत्वतदुत्तरभाविस्वाष्टगुणाभिव्यञ्जकत्वादयो धर्माःप्रतिपिपादयिषिताः। ततश्च तत्प्रयोजकज्ञानबलैश्वर्यशक्त्यादयोऽन्ये च गुणा आक्षिप्ताः। '**श्रीयते चाखिलैर्नित्यम्**' (अहि-सं- ५१-६१) इत्यावृत्त्या उपेयत्वप्रयोजकाः सौशील्यादयोऽपीति आकारत्रयोपयुक्तगुणाः तदुपलक्षिताश्च सर्वेऽपि गुणा व्यज्यन्त इति दिक्। **प्रथितविभवाम्** इति विभूतेरुक्त्या ऐश्वर्यस्यापि व्यञ्जितत्वात् '**भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्ये**' (श.ग. १) त्याद्यगद्योक्तं सर्वं संगृहीतमत्रापीति सङ्क्षेपः॥ १॥

एवमाद्यपद्य एव देव्या निरवधिकगुणत्वमीश्वरत्वनियतं सामान्यतोऽनुसन्धाय, कथमीदृशीमेनां तुष्टूष इति स्वाशयं विज्ञापयति—

आविर्भावः कलशजलधावध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षस्स्थलं वा।
भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम्॥ २॥

आविर्भावेत्यादिना । समुदितस्वरूपादिभिरपि गुणैः स्तवनं देव्याः सर्वज्ञैरपि दुष्करम् । नाप्येकैकगुणेन । तस्याप्येकैकस्य निरवधिकतया कात्स्न्येंन वर्णनासंभवात् । न ह्यपरिमेयस्य, निरवधेरियत्तया परिच्छिन्नवर्णनमीश्वरेणापि शक्यम् किमुत **स्तोकप्रज्ञैः** । तदुक्तम् '**त्वद्वल्लभोऽपि प्रभुः नालं मातुम्** (च. श्लो-२)' इति '**देवि त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायते** (श्रीस्त. श्लो. ८)' इति च । एवं स्थिते **स्तोकप्रज्ञैः** अल्पप्रज्ञैर्मादृशैः । **कथं स्तूयसे** न कथंचिदित्याशयः । **सा** '**न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधस** (वि. पु. १-९-१३३)' इति ब्रह्मणाप्यशक्यस्तवना यावद्गुणतया प्रसिद्धा । यद्यपि **से**ति तत्पदस्य पूर्ववाक्यस्थयच्छब्दत्रयप्रतिसंबन्धित्वमेव, तथाप्यौचित्यात् प्रसिद्धार्थत्वमप्याश्रीयते । **अनवधिगुणा** अनवधिः एकैको गुणो यस्यास्सा । एवं पदद्वयेनापि यावद्भिरपि गुणैरेकैकेनापि गुणेन विशिष्य स्तवनं न संभवतीति ध्वनितम् । यथा त्वमनवधिगुणतया अशक्यस्तवनासि, एवमयोनिजाविर्भावतया सुगन्धिपवित्रपद्मालयतया विष्णावप्यसंभावितविष्णुवक्षस्स्थलवास्तव्यतया उभयविभूतिस्वामितया चाशक्यस्तवना त्वमसीत्याह-**आविर्भाव** इत्यादिना । **कलशजलधौ** क्षीराब्धौ । **अध्वरे** जनकराजस्याध्वरशालायाम् । **वाऽपि** इत्यव्ययद्वयं समुच्चयार्थकम् । **आविर्भावः** अभिव्यक्तिः । अतः कौसल्यादिगर्भवासादिसहितभगवदवतारापेक्षयाऽप्ययोनिजावतारत्वप्रकटनात् देव्योऽवतारवैलक्षण्यं सूचितम् । **सरसिजवनम्** पद्मवनम् । **विष्णुवक्षस्स्थलं** वा यस्याः स्थानम् अत्रापि **वा**शब्दः चार्थः । स्वतस्सिद्धसौगन्ध्यपवित्रत्वादिविशिष्टस्थानद्वयं विष्णोरपि न घटते । न हि श्रीरङ्गवेङ्कटाचलादिकं पद्मवनमिव विष्णुवक्षस्स्थलमिव च स्वतस्सुगन्धि सुकुमारं स्वतः पावनं वा । अतो भगवतोऽप्यतिशयितासना त्वं कथं स्तूयस इति भावः । **अखिलम्** अशेषम् । भवतीति **भुवनम्** नित्यविभूतिव्यावृत्तम् प्रपञ्चजातमित्यर्थः । **दिव्यं पदं वा** त्रिपाद्विभूतिश्च । **यस्या भूमा** वैपुल्यं समृद्धिरिति यावत् । यद्यपि '**बहोर्लोपो भूचबहोः**' (पा.सू.६.४.१५८)'ति भूमन्शब्दो बहुत्वार्थकः, तथापि भूमाधिकरणप्रक्रियया वैपुल्यार्थे भूशब्दः औपचारिकः । तथा च यस्याः भूमा विस्तारः समृद्धिरिति यावत् । स्तोत्रतो व्यावृत्तिप्रदर्शकोऽप्ययं श्लोकः कार्पण्यप्रकटनेन मातुः दयोत्तम्भकत्वावि-

शेषात् स्तोत्राशक्तिमुखेन गुणातिशयवर्णनात् स्तोत्रकोटावनुप्रविष्ट एवेति ध्येयम् ॥ २ ॥

एवं स्तोत्राशक्तिप्रदर्शनमात्रेण दयमानया मातुर्हृदयमार्दवमालोच्य स्तोत्रनिवृत्तेरशक्यतया देवी मयि स्तोत्रमात्रेण स्तोत्राशंसामात्रेण वा प्रसन्ना भविष्यतीति अभिसन्धायाऽऽह—

स्तोतव्यत्वं दिशति भवती देहिभिस्स्तूयमाना
तामेव त्वामनितरगतिस्स्तोतुमाशंसमानः ।

सिद्धारम्भस्सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ३ ॥

स्तोतव्यत्वमिति । **भवती देहिभिः** देवमनुष्यादिविशेषानालोचनेन शरीरिमात्रैः **स्तूयमाना** वर्तमानार्थलडादेशेन स्तोत्रापरिसमाप्तिः द्योत्यते । आरभ्यमाणस्तवना सती । **स्तोतव्यत्वं दिशति** सकलभुवनस्तवनार्हतावच्छेदकगुणविशेषवन्तं कृत्वा तस्यान्यैः स्तुतिमुत्पादयति, मातुः स्तुतिफलमपि स्तुतिरेवेति चमत्कारः । **तामेव त्वाम्** स्तुत्यारम्भेणैव फलप्रदां त्वामेव **अनितरगतिः** अहं स्तोत्रारम्भेऽप्यशक्त इति त्वां विना गत्यन्तरमुपेयान्तरमजानन् । **स्तोतुमाशंसमानः** न तु स्तुतिमारभमाणः आशंसामात्रेण । **सिद्धारम्भः** सिद्धस्तोत्रारम्भसामर्थ्यः । **सकलभुवनश्लाघनीयो भवेयम्**

'स श्लाघ्यः स गुणी धन्यः सकुलीनः स बुद्धिमान् ।
स शूरस्स च विक्रान्तो यं त्वं देवि निरीक्षसे ॥'

(वि.पु. १-९-१३१)

इति हि स्मृतिः । उक्तमर्थमर्थान्तरन्यासेन दृढयति—**सेवे**ति । सेवा त्रिविधा कायिकी वाचिकी मानसिकी चेति । स्तोत्रस्य वाचिककैङ्कर्यतया सेवारूपत्वेन तदपेक्षात्वं सामान्यम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । **कस्य श्रेयसे न स्यात्** अत्यन्तमशक्तस्यापि श्रेयसे स्यादेवेत्यर्थः । **श्लाघनीयो भवेय**मिति देशिकस्य ख्यातिप्रार्थना कथमुपपद्यते । उच्यते न तावदिदमाशीः, भूयासमिति रूपा-

पत्तेः । नापि प्रार्थने लिङ्; उत्तमपुरुषस्वारस्यात् । त्वं मां श्लाघनीयं कुर्या इति वचनव्यक्तिः तदा स्यात्, किं तु विधिलिङ् । ऊत्तमपुरुष एवायम् । यद्वा **सकलभुवनश्लाघनीयो भवेयम्** स्वभक्त्यादिनेति शेषः । त्वच्चरणभक्तिमान् भवेयमित्यर्थः ।

'तत्पादभक्तिज्ञानाभ्यां फलमन्यत् कदाचन ।

न याचेत् वैष्णवो विष्णुम् ॥' (अहि.सं.) इति वचनात् भक्तिप्रार्थनं ह्यनवद्यम् । न ह्यभिजनविद्यावृत्तादिकं सर्वश्लाघ्यताप्रयोजकम् । स्त्रीशूद्रादेरपि शबरीविदुरधर्मव्याधादेस्तथात्वादिति दिक् ॥ ३ ॥

अथ स्तोत्राशंसाप्रयुक्तं स्तोत्रारम्भाधिकारं विवृण्वन् स्तोतुमारभते—

यत्संकल्पात् भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रलयरचना जङ्गमाजङ्गमानाम् ।
तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कम् ॥ ४ ॥

यत्संकल्पादिति । **कमले, देहिनि** शरीरवति **'यस्याव्यक्तं शरीरम्' 'यस्यापः शरीरम्'** (बृ.उ. ५-७-८) **'यस्य पृथिवी शरीरम्'** (बृ.उ. ५-७-७) **'यस्यात्मा शरीरम्'**इत्यादिना सूक्ष्मचिदचिच्छरीरकत्वेन सिद्धे । **यत्र** ब्रह्मणि । **अमीषाम्** प्रत्यक्षतो दृश्यमानानाम् । जङ्गमाजङ्गमानाम् चराचराणाम् । **जन्म-स्थेम-प्रलयरचना** उत्पत्ति-स्थिति-विनाशरचना । स्थेमन्शब्द औणादिबाहुलकेमन्प्रत्ययान्तस्थाधातुनिष्पन्नतया स्थितिवाचकः । **यत्संकल्पात् भवति 'तदैक्षत बहु स्याम् प्रजायेय'** (छा. उ. ६-२-३) इत्यादिश्रुत्या ब्रह्मणः संकल्प एव हि सर्गादौ नियामकः । चिदचिद्विशिष्टे यस्मिन्नेव जगदुत्पत्तिस्थितिविनाशाः पर्यवस्यन्ति । यथा देवदत्त उत्पन्न विनष्ट इत्यादिव्यवहाराः शरीरद्वारा शरीरिणि पर्यवस्यन्ति तद्वत् । एवं सूक्ष्मचिदचिद्विशिष्टविधया ब्रह्मणः उपादानत्वम्, स्थूलचिदचिद्विशिष्टविधया ब्रह्मण एवोपादेयत्वम्, निष्कृष्टविधया निमित्तत्वमिति फलितम् । अन्तः प्रविश्य नियमनादिकं हि न विशिष्टस्य संभवति । **'तत्सृष्ट्वा । तदेवानुप्राविशत्'** (तै.उ.

इति । विशिष्टे विशिष्टानुप्रवेशासंभवात् । अत्र च शरीरलक्षणं यथा पृथिव्यादिसाधारणम्, यथा च शरीरवाचिनां शब्दानां शरीरिपर्यन्तत्वम्, यथा चोपादानोपादेययोरनन्यत्वम्, यथा शरीरगतानां विनश्वरत्वादिदोषाणां न शरीरिब्रह्मगामित्वम् तथा भाष्यादौ प्रपञ्चितं द्रष्टव्यम् । **कल्याणम्** मङ्गलरूपम् । सर्वशरीरकत्वेऽपि शरीरगतानाम् अमङ्गलानामसंस्पर्शेन शोभनैकरूपम् । अत एव **'न सन्न चासत् शिव एव केवल'** इति शिवशब्देन भगवतो नारायणस्यैवाभिधानम्, न देवतान्तरस्य, **'आविरिञ्चादमङ्गलम्'** इति तस्याशुभत्वप्रतिपादनात् । **यमिनाम्** सनकादियोगिनाम् । समाधौ एकलक्ष्यम् ध्याने शुभाश्रयतया विषयान्तरव्युदासपूर्वकं निर्धार्य विषयीकृतम् । यद्वा **'कारणं तु ध्येय'** (अ.शि.उ. १७) इति जगत्कारणतया निर्धारणादेव ध्येयतया निश्चितम् । **पूर्णम्** अखण्डम् । **किमपि** वाङ्मनसानास्पदम् । **तत्** प्रसिद्धं तेजः । **'अथ यदतः परो दिव्यो ज्योतिरि'** (छा.उ. ३-१३-७) त्यात्मानं परं ज्योतिः । **भवतीपादलाक्षारसाङ्कम्** भवत्याः चरणालक्तकचिन्हितम् । **स्फुरति** प्रकाशते । तेजश्शब्देन सामान्यतो निर्दिष्टं कारणवस्तु नारायणाख्यमिति निश्चीयते । कारणवाक्येषु क्वचित् **'सदेव सौम्य इदमग्र आसीत्'** (छा.उ. ६.२.१) इति सतो जगत्कारणत्वं श्रूयते; क्वचित् **'असदेवेदमग्र आसीत्'** (छा.उ. ३-१९-१) इत्यसतः, क्वचित् **'आत्मा वा इदमग्र आसीत्** (ऐ.उ. १-१-१) 'इत्यात्मनः, अन्यत्र **'ब्रह्म वा इदमग्र आसीत्'** (बृ.उ. ३.४.११) इति ब्रह्मणः, **'हिरण्यगर्भस्समवर्तताग्र'** इत्यादौ चतुर्मुखस्य **'न सन्न चासच्छिव एव केवल'** इति शिवस्य **'एको ह वै नारायण आसीत्'** (महोप. १-१)इति नारायणस्येति नानाशब्दात् श्रूयन्ते । तत्र यद्यपि सदसच्छब्दवाच्यस्य ब्रह्मत्वं स्वध्यवसानं छागपशुन्यायेन विशेष उपसंहर्तुमुचितत्वात् ब्रह्मणश्चावस्थाभेदेन सदसच्छब्दवाच्यत्वाच्च, तथापि जगत्कारणत्वं ब्रह्मविष्णुरुद्रादिषु विनिगमकाभावात् न निर्धारयितुं शक्यते । तस्मात् **'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'** (तै-उ.) इति श्रवणात् लक्ष्मीपतित्वमेव लिङ्गं निश्चायकमिति पुरुषोत्तम एव तादृश इति निर्धार्यत इति तात्पर्यम् । तदुक्तम्—

'ईष्टे कश्चित् जगत इति यः पौरुषे सूक्त उक्तः
तं च त्वत्कं पतिमधिजगावुत्तरश्चानुवाकः ॥' (श्रीगुण. १३)

इति, **'वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति'**(श्रीगुण-... इति च। **'पश्यतां सर्व देवानां ययौ वक्षस्स्थलं हरेः'** (वि.पु. १-९-१०५) श्री... वक्षस्स्थलारोहणवेलायां लाक्षारसार्द्रितश्रीचरणारविन्दन्यासावश्यंभावात् तदङ्कि... त्वमुपपन्नम्। यद्वा प्रणयकलहादिसमये देवीचरणारविन्दताडितं तद्वक्षः, चरणल... क्षाङ्कितमिति भावः। ननु लक्ष्मीपतित्वमेव विनिगमकमित्युक्त... ब्रह्मरुद्रादीनामुत्पत्तिविनाशादिमत्त्वमेव निरासकं भविष्यति, किमनेन लक्ष्मीपति... नेति चेत् **'ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते'** इति त्रिमूर्तिमध्यस्थस्यापि विष्णो... **'अजायमानो बहुधा विजायते'**इत्यैच्छिकजननमादाय तदितरसामान्येनोत्पत्ति... चनेऽपि ब्रह्मरुद्रादिभिः, समभिव्याहारात् साक्षादुत्पत्तिरेव किं न स्यादित्युत्पत्ति... ङ्कया तदुत्पत्तेरनियामकत्वादिदमेव लिङ्गमन्यथासिद्धमिति भाव... **भवतीपादलाक्षारसाङ्कम्** इत्यत्र **भवतीशब्दस्य** सर्वनामत्वेन सर्वनाम्नो वृत्ति... पूर्वपदस्य पुंवद्भाव इति भवत्पादलाक्षेति स्यादिति चोदयन्ति।

'एकोऽहं भवतीसुतक्षयकर' इति वेणीसंहारे, (५-९)

'भवतीसंबन्धदृष्ट्या हरिम्'(श्रीगुण.श्लो. ५१) इति श्रीगुणरत्नकोशे, अ... च बहुशः प्रयोगदर्शनेन भवच्छब्दस्य सर्वनामभिन्नस्य शतृप्रत्ययान्तस्य संभावि... त्वात्। अन्यथा गत्यन्तराभावादिति परिहरन्ति। तस्मादत्र श्लोके लक्ष्मीदे... स्वाधीनपतिकत्वस्फूर्त्या तत्प्रीत्यर्थमेव भगवतो जगन्निर्माणलीलारम्भ इति। त... धीनमेव तस्य जगत्कर्तृत्वमिति ध्वनितम्। यमिनां ध्यानं च ब्रह्मणः श्रीवैशिष्ट्य... रमणीयमित्युक्तं भवति। वेदादिप्रमाणान्यपि तदङ्घ्रिमुद्रामन्तरेण न ब्रह्म बोध... तुमीशत इत्यपि सिद्धम्। अतो यद्यपि विशिष्टगतमीश्वरत्वं भवति, तथापि त... ष्कृष्टपरमपुरुषतत्त्वं निष्कृष्टश्रीतत्त्वपरतन्त्रमिति स्तुतिश्च। इदं च पत्नीपार... पत्युरैच्छिकमिति न दोषावहम्। केचित्तु **देहिनि** चिदचिच्छरीरके **यत्र अमी** **जङ्गमाजङ्गमानाम्** शरीरभूतानां जन्मादिरचना **यत्संकल्पात् भवतीत्येवं** जङ्गमा... मशब्दो न ब्रह्मपर्यन्तः, विशिष्टस्येव विशेषणानामपि जन्मादिसंभवात्। यत्रेत्ये... धारताप्रदर्शनाय, न तु जन्मादिपर्यवसानभूमिताप्रदर्शनाय। तत् ...

भवतीपादलाक्षारसाङ्कं सत् स्फुरति अधिकं शोभते, श्रीपदचिह्नस्यैव भूषणतया शोभातिशयसमर्पकत्वात् इत्याहुः ॥ ४ ॥

नन्वेवं श्रियो जगत्कर्तृभगवदनुमन्तृत्वेन वा प्रेरकत्वेन वा जगत्कर्तृकोटावनुप्रवेश उक्तः। तथा सति ईश्वरद्वित्वापत्तिः, **'जन्माद्यस्य यतः'** (ब्र. सू. १.१.३) इत्युक्तलक्षणं लक्ष्म्यामतिप्रसक्तं च स्यात्, निस्समाभ्यधिकं च न स्यात्। न चोभयगतमीस्वरत्वं एकम्, यथा यागादिकर्तृत्वमेकं कर्तृत्वाश्रयव्यक्तिभेदेऽपि कर्तृत्वे भेदाभावात् जायापतिव्यासक्तमिति वाच्यम्। एवं सति लौकिकदम्पतिन्यायेन कदाचित् विरोधादिसंभवेन जगत्सर्गादावनैकमत्यप्रसङ्गेन जन्मस्थेमाद्यप्रवृत्त्यापत्तेः। अन्यतरवैकल्यप्रवृत्तौ च सुतराम् न हि दम्पत्योरन्यतरलोपेऽपि यागादिकमस्ति अनयोर्गुणवैषम्यं च यदि लौकिकनयात्, तथापि कार्यविरोधः, परस्परमानुरूप्यं च तयोः न स्यात्। **'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'**(तै-उ.) इति श्रवणात्, प्राथम्यात् ह्रीविष्णोरेव जगत्कर्तृत्वमस्तु, **'अस्येशाना जगतो विष्णुपत्नी'** इति अस्य च मन्त्रस्य विष्णुपत्नीमात्रतुल्यत्वात्। तस्मात् जगत्कर्तृत्वे श्रियो विशेषकप्रमाणाभाव इत्याशङ्कां व्युदस्यन् एव लक्ष्मीविशिष्टस्यैव ईश्वरत्वं स्थिरीकरोति—

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम्।
शेषश्चित्तं विमलमनसां मौलयश्च श्रुतीनां
संपद्यन्ते विहरणविधौ यस्य शय्या विशेषाः ॥ ५ ॥

निष्प्रत्यूहेति। निष्प्रत्यूहप्रणयघटितम् निष्प्रत्यूहेन निर्विघातेन, प्रणयेन अन्योन्यानुरागेण घटितं यथा कदापि विश्लेषो न भवति तथा सुश्लिष्टम्, प्रणयविशेषेण स्वरूपे रूपे च गाढोपगूढमिति यावत्। उक्तं हि भगवच्छास्त्रे भगवता स्वस्वरूपश्रीरूपयोर्गाढोपगूढत्वम्—

'तथा लक्ष्म्याः स्वरूपं च वक्ष्ये शृणु समाहितः।
गुणतश्च स्वरूपेण व्याप्तिः साधारणी मता ॥

यथा मया जगद्व्याप्तं स्वरूपेण स्वभावतः ।
तया व्याप्तं तथा सर्वं नियन्त्री च तथेश्वरी ॥

मया व्याप्ता तथा साऽपि तया व्याप्तोऽहमीश्वरः ।
मम लक्ष्म्याश्च सेनेश वैलक्षण्यमिदं शृणु ॥

मच्छेषभूता सर्वेषामीश्वरी वल्लभा मम ।
तस्याश्च जगतश्चाहमीश्वरो वेदविश्रुतः ॥

अस्या मम च शेषं हि विभूतिरुभयात्मिका ।
इति श्रुतिशिरस्सिद्धं मच्छास्त्रेष्वपि मानद ॥' (वि.सं.) इति ।

'अस्या देव्या मनस्तस्मिन् तस्य चास्यां प्रतिष्ठितम् ।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥' (रा.सु. १५-२५)

'अनन्या राघवेणाहं भास्करेण प्रभा यथा । (रा.सु. २१-१५)
अनन्या हि मया सीता मैथिली जनकात्मजा ॥' (रा.सु.)

इत्यत्रानन्यत्वम् अनन्यवदवभासमानत्वम् अविनाभूतत्वमिति यावत्। एतेन प्रणयविघातसंभावनया सर्गादावनैकमत्यशङ्का निरस्ता । **नित्यानपायम्** नित्यं च तत् अनपायं च; नित्यत्वं कालपरिच्छेदराहित्यम्, अपायः संश्लेषस्य विच्छेद इहोच्यते । तद्राहित्यमनपायत्वम् । तदुक्तं श्रीविष्णुपुराणे—

'नित्यैवेषा जगन्माता विष्णोः श्रीरनपायिनी' (वि.पु. १-८-१७)

इत्यादि । श्रीसूक्ते च **'श्रियं लोके देवजुष्टामुदाराम्'** (श्रीसू. -५) इति । अत्र देवशब्दः **'दिव्यो देव एको नारायण'** इति नारायण एव मुख्यवृत्तः । **'जुष प्रीतिसेवनयोः'** इति धातुरत्रोभयार्थः बाधकाभावादित्याहुः । एतेन द्वन्द्वेऽन्यतरलोपादिकृतजगत्सर्गादिविलम्बनशङ्का निरस्ता । अनवधिगुणम् अवधिरहिताः संख्यारहिता गुणा यस्य । यद्वा एकैकोऽपि गुणोऽवधिरहितः परिच्छेदरहितः इयत्तया परिच्छेदनानर्हाः । ज्ञानशक्त्यादयो हि गुणाः सर्वेऽपि साधारणाः उभयोरीश्वरत्वात् । तदुक्तं श्रीगुणरत्नकोशे—

'प्रशकनबलज्योतिर्ज्ञानैश्वरत्वजयप्रथा
प्रणतवरणप्रेमक्षेमङ्करत्वपुरस्सराः ।
अपि परिमलःकान्तिर्लावण्यमर्चिरितीन्दिरे
तव भगवतश्चैते साधारणा गुणराशयः ॥' (श्रीगुण. श्लो ३२)

इति । एतेनेदं लक्ष्मीनारायणाख्यं मिथुनं परस्परमनुरूपमित्युक्तं भवति । तदिदमानुरूप्यं परदेवतापारमार्थ्यविदग्रेसरेण भगवता पराशरेण श्रीविष्णुपुराणे कण्ठत उक्तम् । तथा हि—

'यथा सर्वगतो विष्णुः तथैवेयं द्विजोत्तम ।
अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः ॥

बोधो विष्णुरियं बुद्धिः धर्मोऽसौ सत्क्रिया त्वियम् ।
स्रष्टा विष्णुरियं सृष्टिः श्रीर्भूमिः भूधरो हरिः ॥

इच्छा श्रीर्भगवान् कामः यज्ञोऽसौ दक्षिणा तु सा ।
आज्याहुतिरसौ देवी पुरोडाशो जनार्दनः ॥

सामस्वरूपी भगवानुद्गीथः कमलालया ।
स्वाहा लक्ष्मीर्जगन्नाथो वासुदेवो हुताशनः ॥

शङ्करो भगवान् विष्णुर्गौरीलक्ष्मीर्द्विजोत्तम ॥

मैत्रेय केशवस्सूर्यः तत्प्रभा कमलालया ।
विष्णुः पितृगणः पद्मा स्वधा शाश्वतपुष्टिदा ॥

शशाङ्कः श्रीधरस्तस्य कान्तिः श्रीरनपायिनी ।
लक्ष्मीस्वरूपमिन्द्राणी देवेन्द्रो मधुसूदनः ॥

यमश्चक्रधरस्साक्षात् धूमोर्णा कमलालया ।
ब्रह्मा विष्णुस्स सर्वात्मा वाग्देवी श्रीर्महामते ॥

किं वात्र बहुनोक्तेन संक्षेपेणेदमुच्यते ॥' (वि.पु १-८-१७-२५)

इत्यादिभिः। अनेन लौकिकदम्पतिन्यायात् गुणवैषम्यमानुरूप्यं च न स्यादिति शङ्का निरस्ता। उभयोरनवधिगुणत्वप्रतिज्ञानात्। **विष्णुत्वं चेति द्वन्द्वम्** मिथुनम्। न तु विष्णुः ह्रीश्चेति द्वन्द्वम्; न वा विष्णुर्नीला चेति। तयोः स्वरूपेण व्याप्त्यभावात्। धर्मभूतज्ञानद्वारा हि तयोर्व्याप्तिः। तथा चोक्तम्—

'तथा भूमिश्च नीला च शेषभूते मते मम।
यथात्मानं हि सर्वेषां ज्ञानतो व्याप्तिरिष्यते॥

स्वरूपतस्तु न तयोर्गुणतो व्याप्तिरिष्यते॥'

इति भट्टाचार्यैः।

'देवि त्वामनुनीलया सह महीदेव्याः सहस्रं तथा' (श्रीगुण.श्लो.-२६) इति। अत्रानुः कर्मप्रवचनीयो हीनार्थः, तस्मात् लक्ष्मीविशिष्टमेकमीश्वरतत्त्वमित्युक्तं भवति। उक्तं च देव्यैव—

'भवान् नारायणो देवः भावो लक्ष्मीरहं परा।
लक्ष्मीनारायणाख्यं तत्परं ब्रह्म सनातनम्॥' (अहि. सं-२-२८)
इति।

एतेन ईश्वरद्वित्वशङ्काऽनवकाशात्। लक्ष्यभूतायां लक्ष्म्यामतिव्याप्तेरदोषत्वात्। लक्ष्म्याः विशेषणत्वेन ईश्वरत्वेऽपि भगवच्छेषत्वात् भगवतः सर्वशेषित्वेन निस्समाभ्यधिकत्वात्। ननु लक्ष्म्याः एकोनशेषित्वमात्रेण न तावदीश्वरत्वम्। कतिपयशेषित्वस्य जीवसाधारणत्वात्। यावद्वस्तुशेषित्वं च नेश्वरेऽप्यस्ति; स्वं प्रति स्वस्याशेषित्वात्। स्वव्यतिरिक्तयावद्वस्तुशेषित्वं तु लक्ष्म्यां न सुवचम्, स्वातिरिक्तविष्णुं प्रति शेषित्वासंभवादिति चेत्-न; स्वशब्दस्य लक्ष्यपरत्वात्, उभयोरपि लक्ष्यतया तदनन्यशेषित्वस्य लक्ष्म्यामपि संभवात्। एवं चेश्वरत्वेन प्रमाणसिद्धमेव स्वपदेन विवक्षितम्। तदन्ययावद्वस्तुशेषित्वमीश्वरत्वमिति निष्कर्षः। अन्योन्येन लक्ष्यं लक्षणीयं निरूपणीयमिति यावत्। लोके वेदे च विष्णुपत्नीत्वेन श्रियः पतित्वेन च तयोर्व्यवहारप्राचुर्यात्। यद्वा अन्योन्येन लक्ष्यं दृश्यं लक्षदर्शनाङ्कनयोः श्रिया हि दृश्यो देवः तेन च दृश्या देवी उभयोः परस्परं प्रतिश्रीत्वात्। 'क

श्रीः श्रियः' (स्तो.र. १२) **'तव श्रिया'**(स्तो.र. ३८) इति च परस्परस्य श्रीत्ववचनात्, एवं परस्परं द्वावप्यनुरूपाविति भावः। ननु लक्ष्म्याः कथमीश्वरत्वम्, भगवत इव शेषशयनत्व-योगिध्येयत्व-वेदान्तवेद्यत्वाभावादित्याशङ्क्य उक्तं विशेषणत्रयमप्युभयसाधारणमित्याह-**शेष** इत्यादि। **शेषः** अनन्तः। **विमलमनसाम्** योगिनां चेतः। **श्रुतीनां मौलयः** वेदान्ताश्च। **यस्य** मिथुनस्य। **विहरणविधौ शय्याविशेषाः** संपद्यन्ते आधाराधेयभावेन ध्यातृध्येयत्वेन तात्पर्यविषयत्वेन च त्रितयगतत्वं मिथुनस्य संभवति। तदधिकरणत्वात् त्रयाणामपि शय्यात्वेन निरूपणम् **'भोगप्रिया भोगवती भोगीन्द्रशयनासना'** (ल.स. १२०) इति श्रीसहस्रनामपाठात् शेषशयनत्वं सिद्धम्। योगिध्येयत्वं

'सर्वकामप्रदां रम्यां संसारार्णवतारिणीम्।
क्षिप्रप्रसादिनीं लक्ष्मीं शरण्यामनुचिन्तयेत्॥' (ब्रा. पु.)

इति स्वायम्भुवचनात् विशिष्टस्य प्रत्यगात्महविस्समर्पणयज्ञदेवतात्वं च सिद्धम्। अत एव वेदान्तवेद्यत्वं चेति दिक्॥ ५॥

न्विह प्रत्यगात्महविस्समर्पणयज्ञे भगवत एव संप्रदानता, **'वसुरण्यो विभूरसी'**(तै.उ. ६-३)ति तत्करणमन्त्रे तस्यैव प्रकाशनात्; तदुत्तरप्रणवे च अकारवाच्यस्य तस्यैव कण्ठोक्तेश्च इत्यवान्तरशङ्कां व्युदस्यन्नेव सकलवेदान्तापरिच्छेद्यमहिमाशालित्वमुभयोरप्यविशिष्टमिति तयोः न कदाचिदनानुरूप्यमित्याह—

उद्देश्यत्वं जननि भजतोरुज्झितोपाधिगन्धं
प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात्।

पद्मे पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन् मानसं नः॥ ६॥

उद्देश्यत्वमिति। हे **पद्मे, जननि, प्रत्यग्रूपे हविषि** न्यासविद्यायाम् **'ओमित्यात्मानं युञ्जीत'** (तै.उ.-६-३) इति विधिना मुमुक्षुभिः क्रियमाणे प्रत्यगात्मस्वरूपसमर्पणयज्ञे तस्मिन्नेव हविषि। उज्झितोपाधिगन्धम् इन्द्रादीनां भगवच्छरीरत्वेन उपाधिना हविरुद्देश्यत्वरूपं देवतात्वं भगवतस्तु न तथा। साक्षादेव हविषो भोक्तृ-

त्वादत उक्तम् उज्झितोपाधिगन्धमिति । तादृशमुद्देश्यत्वं संप्रदानत्वम् । भजतोरे-कशेषित्वयोगात्—

'लक्ष्म्यास्समस्तचिदचित्प्रपञ्चो व्याप्यस्तदीशस्य तु सापि ।
तथाप्यनन्यसाधारणमीशितृत्वं श्रीश्रीशयोर्द्वौ च सदैकशेषी ॥'

(अहि.सं)

इत्यहिर्बुध्न्यवचनेन **'उभयाधिष्ठानं चैकं शेषित्वम्'**(ष. सं.) इत्युक्त्या च जगदीश्वरत्वस्याप्युभयाधिष्ठानत्वात् । **नित्यम्, निगमैः** वेदैः । **अन्विष्यमाणः** परिच्छेदाभावादद्याप्यालोच्यमानः । शतगुणितदशाशिरस्कतया **'स एको ब्रह्मण आनन्दः'**(तै.उ.) इति मीमांस्यमानः, आनन्दमीमांसायास्सकलगुणोपलक्षणार्थत्वात् । अत एवोक्तम् **'एकैकगुणावधीप्सया'** (स्तो.र. २२) इति । **पत्युस्तव च महिमा न मानसम्** आश्चर्यात् । **नर्तयन् अवच्छेदं न भजति** अवच्छेदं परस्परव्यवच्छेदं पृथक् पृथक् निर्देशत्वरूपमवच्छेदं न भजति । प्रत्यगात्मा हविस्समर्पणकरणमन्त्रस्य प्रणवस्यानुष्ठेयार्थप्रकाशकत्वावश्यंभावात् 'अग्नये स्वाहा' इत्यादिवत् अकारार्थाय मकारवाच्य इति तादर्थ्यचतुर्थ्याश्रयणेन प्रस्तुतार्थबोधकत्वं वाच्यमिति अकारप्रकृतेः **'अव'** रक्षण इति धाताववतेःटिलोपश्चेति तद्रूपनिष्पत्तौ सत्यां रक्षकत्वं चासंकोचादखिलविषयकमिति सर्वरक्षको नारायण एव युक्तः । स च

'लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया ।
रक्षकस्सर्वसिद्धान्ते वेदान्तेषु च गीयते ॥'(ल.तं. २८-१४)

इति श्रीमन्नारायण एवाकारार्थ इत्युक्तं भवति । मध्यस्थित उकारो लक्ष्मीवाचकः ।

'अकारेणोच्यते विष्णुस्सर्वलोकेश्वरो हरिः ।
उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा ॥
मकारस्तु तयोर्दासः इति प्रणवलक्षणम् ॥' (कठश्रुतिः)

इति श्रौतनिरुक्तिविधया शाब्दमेव श्री-श्रीशयोरुद्देश्यत्वमप्याहुः । अयं चार्थो द्वयस्य पूर्वखण्डस्थश्रीमन्नारायणशब्देन विशदीकृतः । **'वसुरण्य'**(तै.उ. ६.३)

इति मन्त्रे च **'ब्रह्मणे त्वा महस'**(तै.उ-६.३) इति चतुर्थ्यन्तब्रह्मशब्दोऽपि विशिष्टपरः । एवं सर्वेषु वेदान्तेषूत्सर्गात् विशिष्टपरा भगवच्छब्दा योज्याः । तदुक्तम्—

'तदन्तर्भावात् त्वां न पृथगभिधत्ते श्रुतिरपि' (श्रीगुण. श्लो.-२८)

इति यस्मात् आत्महविरुद्देश्यत्वं सकलजगच्छेषित्वं न द्वयं साधारणम् तस्मादेव हेतोः आनन्दवल्ल्यादौ **'यतो वाचो निवर्तन्ते'**(तै.उ.) इत्यपरिच्छेद्यतया कीर्त्यमानो महिमा भर्तुरिव तवापीति हेतुहेतुमद्भावेन योज्यम् । आत्महविरुद्देश्यत्वस्याविशेषे हि प्रणवादिकरणमन्त्राभिधेयत्वावश्यंभावात् इतरेऽप्यागमाः तदुभयपरा इत्यानन्दवल्ल्यपि तदुभयमहिमापरिच्छेद्यतामभिधत्ते । सकलजगच्छेषित्वमपि नैकस्मिन्नेव पर्याप्तमिति ईश्वरत्वपर्याप्त्यधिकरणयोर्द्वयोरपि अपरिच्छेद्यमहिमत्वपरा **'यतो वाच'** इति श्रुतिरिति भावः ॥ ६ ॥

ननु जगन्निर्माणादिलीला भगवत एवाभिधीयते

'लीला जगत्पतेस्तस्य छन्दतः संप्रवर्तते ।
मोदते भगवान् भूतैर्बालः क्रीडनकैरिव ॥'

'लोकवत्तु लीलाकैवल्यम्' (ब्र. सू. २.१.३३) इति । न हि लक्ष्म्यास्तत्रान्वय उच्यते । अतो लीलास्वैकरस्यविरहात् सर्गादिकर्तृत्वेऽप्यनन्वयः स्यादित्याशङ्क्य—

'क्रीडेयं खलु नान्यदास्य रसदा स्यादैकरस्यात् तयोः'(श्रीस्तव-१)

इति **श्रीवत्सचिन्हमिश्र**वचनक्रमेण द्वयोर्लीलायामैकरस्यमाह—

पश्यन्तीषु श्रुतिषु परितः सूरिबृन्देन सार्धं
मध्येकृत्य त्रिगुणफलकं निर्मितस्थानभेदम् ।
विश्वाधीशप्रणयिनि सदा विभ्रमद्यूतवृत्तौ
ब्रह्मेशाद्या दधति युवयोरक्षसारप्रचारम् ॥ ७ ॥

पश्यन्तीति । विश्वाधीशप्रणयिनि विश्वाधीशस्य जगन्नेतुः प्रणयिनि दयिते । एतेन **'लोकवत्तु लीलाकैवल्यम्'**(ब्र.सू. २.१.३३) इति **सूत्रकृता** लोकदृष्टान्तोपपादनात् लीलाप्रवृत्तस्य मण्डलाधीशस्य राज्ञः प्रणयिनीं विना क्रीडासु प्रवृ-

त्यनुपलम्भात् **विश्वाधीशस्य** तत्र तत्साहित्यमावश्यकमित्यर्थो ध्वनितः। **श्रुतिषु** त्रयीषु। **परितः सूरिबृन्देन** नित्यसूरिबृन्देन **सार्धं पश्यन्तीषु 'सदा पश्यन्ति सूरयः'** इति भगवल्लीलादृष्टत्वं नित्यसूरिणामस्त्येव। श्रुतीनां तु स्त्रीलिङ्गनिर्देशात् सहचरीत्वविवक्षया चेतनधर्मो द्रष्टृत्वमुपचर्यते। **निर्मितस्थानभेदम्** निर्मितः कल्पितः स्थानभेदः ब्रह्मलोकशिवलोकादिस्थानभेदः यस्मिन् तत्। अन्यत्र स्थानभेदाश्शाराणां गतागतिविहारे विश्रान्तिभूमयो गृहविशेषाः। **त्रिगुणफलकम्** त्रयः सत्त्वरजस्तमोगुणाः यस्य तत् त्रिगुणम् प्रधानम्, तदेव फलकम् शाराणां संचरिष्णूनामाधारभूतम् अष्टापदाख्यं फलकम्। **मध्येकृत्य** द्वयोर्लीलायां साधारणीकृत्य। अन्यत्र मध्यदेशे स्थापयित्वा **'मध्ये पदे निवचने च'** (पा.सू. १-४-७६) इति गतिसंज्ञायां समासे क्त्वोर्ल्यपि मध्येकृत्य। **युवयोर्विभ्रमद्यूतवृत्तौ,** विभ्रमः विलासः, द्यूतः जयापजयार्थं पणबन्धपूर्वकं कर्म, द्यूतरूपा वृत्तिः व्यापारः विभ्रमार्थं द्यूतवृत्तिः। मध्ये करणद्यूतव्यापारयोः दम्पतिव्यापारत्वेन समानकर्तृकत्वात् वक्ष्यमाणब्रह्मेशादिकर्तृत्वाभावेऽपि क्त्वाप्रत्ययोपपत्तिः द्यूतव्यापारतया सर्गादिलीलानिगीर्याध्यवसीयत इति रूपकातिशयोक्तिः। 'रूपकातिशयोक्तिस्स्यान्निगीर्याध्यवसानतः' इति लक्षणात्। **ब्रह्मेशाद्याः** जीववर्गाः। **अक्षशारप्रचारम्** अक्षाः वाचिकाः अक्षसंबन्धिनः शाराः अक्षशाराः, अक्षपातानन्तरं तत्तत्स्थानेषु संचार्यमाणा दारुविशेषाः शारा इत्युच्यन्ते। दम्पत्योः संकल्पावेव द्वावक्षाविति ध्वनिः। तेषां प्रचारम् ब्रह्मेशानादि प्रचार एवाक्षशारप्रचारत्वेन निगीर्याध्यवसीयत इति तत्रापि रूपकातिशयोक्तिः। **दधति** पुष्णन्ति, धारयन्ति वा। तथा चोभयसंकल्पायत्ता सर्गादिलीलेत्युक्तवचनानि दम्पतिपराणीति भावः॥ ७॥

ननु **'अस्येशाना जगतो विष्णुपत्नी' 'ईशानो भूतभव्यस्य'** इत्युभयत्रेशानत्वश्रवणात् उभयोरपि समप्राधान्यमेव, न तु गुणप्रधानाभाव इति विशिष्टत्वे कुतोऽस्या नियमेन विशेषणत्वम्। विशेषणत्वे वा प्रतर्दनविद्यासु शरीरभूतेन्द्रादेरिव देव्याः मुक्तिदत्वं न सिध्येत्, तथा चापसिद्धान्त इति शङ्काद्वयं परिहरति—

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति।
यन्नामानि श्रुतिपरिपणान्येवमावर्तयन्तो
नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे॥ ८॥

अस्येशानेति। त्वं मुकुन्दम् विष्णुम्। **संश्रयन्ती** पतित्वेन संश्रयन्ती सति, विष्णुशेषभूतैव सतीत्यर्थः। **अस्य जगतः ईशाना असि 'अस्येशाना जगतो विष्णुपत्नी'** इति श्रुतिरनेन संदर्भेण प्रत्यभिज्ञाप्यते। तथा च 'विष्णुपत्नी ईशाने'ति च निर्देशा विष्णुशेषत्वविशिष्टजगदीश्वरत्वविधिपरेयं श्रुतिरिति च ख्यातम्। ननु भगवच्छेषभूतस्य प्रपञ्चस्य तच्छेषभूतलक्ष्मीशेषत्वमित्यनुपपन्नम्, उभयोरपि परशेषत्वेन समत्वात् **'गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्'** इति न्यायात्। अतोऽत्र न विशिष्टविधिपरत्वमस्या इति चेत्—न—यथा एकप्रकरणावगतक्रत्वङ्गभावानामपि प्रोक्षणादीनां श्रुत्यादिवशेन क्रत्वर्थव्रीह्याद्यर्थत्वमविरोधात् तथा। **'ईशानो भूतभव्यस्य'** इत्यादिश्रुत्यवगतेश्वरशेषभावस्यापि जगतः **'अस्येशाने'**ति श्रुत्यनुसारेण भगवच्छेषभूतलक्ष्मीशेषत्वमुपपन्नम्। किं च **'पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतं निर्वपति'** इति स्त्रिया अपि परिणयेन पतिधनस्वामित्वस्य श्रुतत्वात् **'जायापत्योर्न विभागो विद्यते'** इति स्मृतेः **'पत्युर्द्रव्यं पत्न्या अपि'** इति लोकन्यायाच्च भगवच्छेषत्वस्येव लक्ष्मीशेषत्वस्यापि संभवात् उक्तविशिष्टविधिपरत्वे बाधकाभावः। ननु अस्य मन्त्रस्य **'इषयन्ती सुभूतिः शिवानो अस्त्वदितिरुपस्थे'** इति इषयन्तीति शब्दसामानाधिकरण्यात् भूविषयत्वमेवास्तु, इषयन्तीति अनाकारपरिणामहेतुत्वस्य तदर्थः स्यादिति शब्दस्य च प्रसिद्धेरिति चेत् न- **'ईशाने'**ति श्रुत्या **'विष्णुपत्नी'**ति लिङ्गेन च लक्ष्मीपरत्वस्यावर्जनीयत्वात्। न चास्य मन्त्रस्य विशेषाभावात् विष्णुपत्नीमात्रे शेषत्वविधायकत्वमस्त्विति भूमिनीलयोरपीश्वरकोटित्वापत्तिरिति वाच्यम्। **'स्वरूपतस्तु न तयोर्गुणतो व्याप्तिरिष्यते'** इति तयोः स्वरूपव्याप्तिनिषेधेन जीवकोटिप्रवेशस्य पर्यनुयोगानर्हत्वादिति भावः। यदुक्तम् विशेषणत्वे चेन्द्रादिवत् न मुक्तिप्रदत्वम् इति तत्राह—**लक्ष्मीः पद्मे**त्यादिना। **श्रुतिपरिपणानि** श्रुतेः परिपणानि मूलधनानि **'नीवीपरिपणं मूलधनम्'** इत्यमरः।

श्रुत्यन्ततात्पर्यसर्वस्वानीति यावत् । **लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति यन्नामानि** यस्याः नामानि लक्ष्मीसहस्रनामपठितानि । **एवमावर्तयन्तः** पौनः पुन्येन कीर्तयन्तः । **दुरितपवनप्रेरिते** दुरितमेव वृजिनमेव, पवनः तत्प्रेरिते । **जन्मचक्रे** जन्मैव चक्रम् । **दुरितपवनप्रेरित** इति साक्षात् प्रयोगात् मयूरव्यंसकादिसमासः । नोपमितसमासः । **नावर्तन्ते** मुक्ता भवन्तीत्यर्थः । नामसहस्रकीर्तनप्रसन्ना सती सर्वपापनिवर्तनद्वारा मुक्तिं ददातीति भावः । अस्याश्च मुक्तिप्रदत्वं स्वायम्भुव-सात्त्वत-ब्राह्म-वैष्णवेषु **'संसारार्णवतारिणीम्' 'वाचः परं प्रार्थयिता प्रपद्येत् नियतः श्रियम्'**

'यामालम्ब्य सुखेनेमं दुस्तरं हि गुणोदधिम् ।
निस्तरन्त्यचिरेणैव व्यक्तं ध्यानपरायणाः ॥'

'भोगदा मुक्तिदायिनी' 'परनिर्वाणदायिनी'
'सकृद्विभाता सर्वार्तिसमुद्रपरिशोषिणी'

'भवगङ्गापहारिणी' 'ज्योतिष्मत्यमृतावहा' 'विमुक्तिफलदायिनी' (वि.पु. १-९-१२०) इत्यादिप्रमाणशतसिद्धम् ।

'विष्णोर्नामसहस्रं मे श्रृणु पापभयापहम्'

इति विष्णुनामसहस्रस्येव लक्ष्मीनामसहस्रस्यापि कीर्तनं सकलपापप्रणाशकमिति सनत्कुमारसंहितायामभिहितम्—

'श्रृणुष्वावहितो भूत्वा परमैश्वर्यभूतिदम् ।
यश्चैतत् कीर्तयेत् नित्यं श्रृणुयाद्वापि पद्मज ॥

शुचिस्समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ।

ऐहिकामुष्मिकं सर्वं लभते श्रीप्रसादतः ॥
दारिद्र्यं नश्यते तस्य सर्वपापात् प्रमुच्यते ॥' (स.सं) इति ॥ ८ ॥

एवं स्तुतिव्याजेन श्रीस्वरूपमुक्त्वा स्वसिद्धान्तमितरपक्षानादरपूर्वकं स्थिरीकरोति—

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तः कलहमलिनैः किंचिदुत्तीर्य मग्नैः ।
त्वत्संप्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावारूढौ भगवति युवां दैवतं दम्पती नः ॥ ९ ॥

त्वामेवाहुरिति । कतिचित् वादिनः । **त्वां लोकनाथमेवाहुः** सर्वेश्वरेण नारायणेनाभिन्नमाहुः । उभयोर्विग्रहभेदमात्रम् । न त्वात्मभेदः । त्वद्व्यतिरिक्तो लोकनाथो न भवतीत्यर्थः । ते तावदेवम् **'नरनारीमयो हरिः'** (ब्रा.पु.) **'नारायणात्मिका देवी'** (काश्य) ति ब्रह्मकाश्यपीयादिवचनानुसारात्,

'त्वं यादृशोऽसि कमलामपि तादृशीं ते
दारान् वदन्ति युवयोर्न तु भेदगन्धः ।
मायाविभक्तयुवतीतनुमेकमेव
त्वां मातरं च पितरं च युवानमाहुः ॥'

इति विष्णुवैभवोक्तरीत्या सत्तादिविशिष्टो भगवानेव श्रीरिति वा, स्त्रीरूपनित्यविग्रहान्तरविशिष्टस्स एव श्रीरिति वा, दैत्यमोहनभूमिकापरिग्रहन्यायेन स्वयमेव भोगार्थं परिगृहीतकादाचित्ककान्ताविग्रहस्स एव श्रीरिति वा भगवतः स्वरूपैकदेशः पृथक्तया परस्परभोक्तृत्वाय सर्वदा परिगृहीतश्रीरूप इति वा निर्वाहभेदात् स्वरूपैक्यं समर्थयन्ति । यद्वा **'पुंप्रधानेश्वरेश्वरीं'** इत्युक्त्या तत्त्वत्रयेश्वरत्वं लोकनाथशब्दार्थः । **त्वामेव लोकनाथमाहुः** नाथशब्दो नित्यपुल्लिङ्गो द्वितीयान्तः । **अपरे त्वत्प्रियमेव लोकनाथमाहुः** न तु त्वाम् । ईश्वरद्वित्वापत्त्या जीवत्वावश्यंभावादिति भावः । आहत्यपक्षत्रयम् । **अन्तः कलहमलिनैः** परस्परदत्तदूषणकलुषितैः । तथा हि-ब्राह्मपुराणे **'ज्योत्स्नेव हिमदीधितेः'** इत्यादिभेदघटितदृष्टान्तोपदर्शनेन **'विष्णुपत्नी'**ति **'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'** इति श्रुतावेव भेदनिर्देशेन च, विष्णुपुराणे **'त्वयैतद्विष्णुना च'** (वि.पु. १-९-१२६) इत्यादिषु भेदप्रतिपादनाच्च नाभेदपक्षः क्षोदक्षमः इति भेदवादिनो दूषयन्ति । अभेदवादिनः उभयात्मभेदस्वीकारे गौरवात् । ब्रह्माण्डादिवचनस्य लाघवानुगृहीतत्वेन प्रबलत्वात् इतरे भेदवादिनो निरस्ताः । इतरेतरभेदव्यपदेशोऽपि विग्रहाद्युपाधिभेदमादा-

योपपन्नः द्वितीयपक्षो न सांप्रतम् तत्त्वचतुष्टयाङ्गीकारापत्तेः वरच् प्रत्ययान्तादीश्व शब्दात् ङीपोऽप्राप्तेः **'पुंयोगादाख्यायाम्'** (पा.सू. ४-१-४८) इति ङीषाश्रयणेनेश्व रभार्यात्वेनाप्राधान्यमेव सिध्यति । यश्च तृतीयः पक्षः विष्णुरेव श्रीस्तु न तयो सोऽप्यनादेयः । **'त्वया च विष्णुना चाम्ब जगद्व्याप्तं चराचरम्'** (वि.पु. १-९- १२६) **'ईश्वरीं सर्वभूतानाम्'** (श्रीसू. ९) **'ईशाना देवी जगतोऽधिपत्नी'** (तै.ब्रा. ३.३.१२) **अस्येशाना जगतः'** (तै.सं ४-४-१२) **'अस्या मम च शेषं हि विभूतिरु यात्मिका'** (वि.सं.) **'आक्रम्य सर्वां तु यथा त्रिलोकीं तिष्ठत्ययं देववरो सिताक्षि तथा स्थिता त्वं वरदे तथापि'** (वि.स्मृ -९८-६) **'लक्ष्म्यास्समस्तचिदचित्प्रप व्याप्यः** (अहि.सं.) **'यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम'** (वि.पु. १-८-१ इत्यादिप्रमाणप्रतिपन्नजगद्व्यापकत्वशेषित्वसर्वेश्वरभावायाः देव्याः तद्बहिष्क हेत्वभावादिति । अत्रापि पुनश्चोदयन्ति ईश्वरद्वित्वाङ्गीकारापत्तेः गौरवाच्च द्वयो भेदः स्वाभाविकोऽस्तु । भेदवचनान्यौपाधिकभेदपराणीत्यादि, एवं मिथो दूषण लिनैः **किंचिदुत्तीर्य मग्नैः** किंचिदुत्तीर्येत्येव वाद्यन्तरेभ्यः श्रीशब्दवाच्यं किम नास्ति, अस्त्येव तत् । भगवदधिष्ठेया प्रकृतिरेव श्रीः, न तु चेतनभूता काचिदस्ति न तावत् प्रकृतिरियं भगवान्नहमर्थः, तस्याहन्ता सा, भगवतः शक्तिरेव सा, भगव प्रभेत्यादिजल्पकेभ्यो विलक्षणाः श्रियः चेतनत्वमभ्युपगच्छन्त एव तस्या भगव भिन्नत्वं वा अनीश्वरत्वं वेति वदन्त एते यद्यपि अज्ञानसागरात् किंचिदुत्ती तथाविधवक्ष्यमाणसिद्धान्ताज्ञानेन पुनस्तत्र मग्ना एवेत्यर्थः । नद्यादौ किंचिदुत्ती मग्नसदृशत्वात् एतेषां तच्छब्देनाभिधानम् । **किम्** किं फलम् । तेषामन्योन्यदूषणे नैव निरस्ततया अस्माभिः पृथगदूष्यत्वेन तत्संवादस्य निष्फलत्वादिभाव स्वसिद्धान्तमाह **त्वदिति** । **त्वत्संप्रीत्यै** तव संप्रीत्यै । **विहरति** जगत्सर्गादिलील कुर्वति । **हरौ संमुखीनाम्** तात्पर्यवतीनाम् श्रुतीनां भावारूढौ उभावपि अनुमन्तृत्व साक्षात्कर्तृत्वाभ्यां जगदीश्वरत्वाश्रयाविति तात्पर्यगोचरौ युवां दम्पती नः दैवतम् इन्द्राग्न्यादिवदेकं दैवतम्, आत्मस्वरूपहविरुद्धेश्यत्वस्योभयसाधारण्यात्, अ उभयोर्भेदस्य बहुप्रमाणसिद्धत्वेन दुरपह्नवत्वात् लाघवात् एकत्वमभ्युपगम्य बहु

माणबाधे सकलजीवेश्वरभेदासिद्धिप्रसङ्गात् । लक्ष्म्यास्तावदेवं विष्णुभेदे सिद्धे विष्णोरिव

'ईश्वरी सर्वभूतानां नियन्त्री च तथेश्वरी ।
त्वया च विष्णुना चाम्बजगद्व्याप्तं चराचरम् ॥'

'लक्ष्म्यास्समस्तचिदचित्प्रपञ्चो व्याप्यः' (अहि. सं)

इत्यादिवचनबलादीश्वरसिद्धिः । तच्चेश्वरत्वमुभयत्र व्यासज्यवृत्तिदेवतात्ववदेकमिति । ईश्वरद्वित्वापत्तिदूषणानि प्रागेव परिहृतानि । तस्मादेव **दैवतमित्ये**कवचननिर्देशः । तथा च प्रथमश्लोके पुरुषकारतया श्रीशरणागतिमनुष्ठितवद्भिराचार्यैरस्मिन् श्लोके द्वयप्रतिपाद्या सिद्धोपायशरणवरणात्मिका प्रपत्तिः उभयविषयाऽनुष्ठीयते । प्रत्यगात्महविषो रक्षाभरस्य च संप्रदाने देवतात्वेनोभयोरपि दम्पत्योः कीर्तनात् । एतेन स्वसिद्धान्तप्रकटनेन श्रियोऽणुत्वात् जीवत्वं चिदचिदीश्वरभिन्नं तत्त्वान्तरमित्येकदेशिनां पक्षा निरस्तकल्पा इति न गणिता इति मन्तव्यम् । अत्र केचित् उपायकोटौ देवी न प्रवेशमर्हति; उपायद्वित्वापत्तेः । **'मामेकं शरणम्'** इत्युक्तम् । अतो द्वयपूर्वखण्डस्थश्रीमच्छब्दो न वैशिष्ट्यमुपायकोटावाह । किं तु पुरुषकारत्वेन तत्साहाय्यम् । अत एव भट्टार्यैः अष्टश्लोक्याम्

'ईशानां जगतामधीशदयितां नित्यानपायां श्रियं

संश्रित्य' इति मतुबर्थं पुरुषकारत्वेन साहित्यमेवाभिप्रेत्योक्तमित्याहुः । तन्मन्दम्—**'मकारस्तु तयोर्दास'** (कठश्रुतिः) इति प्रणवविवरणरहस्याम्नायपर्यालोचनायाम् अग्नाविष्णुभ्यामितिवत् नामद्वयेन पृथक् पृथक् कीर्तितं लक्ष्मीनारायणसंप्रदानकस्वरूपसमर्पणानुविधायिनि स्वात्मरक्षाभरसमर्पणे विशेषाभावात् । किं चोत्तरखण्डस्थ श्रीमच्छब्देनाप्युपेयवैशिष्ट्यं नाभिधीयते, उपेयद्वित्वप्रसङ्गात् । **'मामेवैष्यसि'** इत्यनन्योपायत्वस्यापि प्रपन्नसाधारणत्वात् । यदि विशिष्टस्योपेयत्वेऽपि तदन्तःपातिनां विशेषणानामुभयभेदकत्वं नास्तीति तदा प्रकृतेऽपि तुल्यम् । भट्टाचार्यसूक्तिरपि न पुरुषकारत्वमात्रपरा, उपायविशेषणत्वमपि तात्पर्यतः स्वीकारे तु दोषाभावात् । अत एव भगवता भाष्यकारेण गद्यद्वयविवरणे

'भगवन्नारायणे' (श.ग.) त्यादिवाक्येन श्रीशरणागतिं पृथगुक्त्वा पुनरपि गद्यान्ते 'श्रीमन्नारायण अशरण्यशरण्य त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये' इति विशेषणकोटावनुप्रवेशोऽपि दर्शित इत्यास्तां तावत् ॥ ९ ॥

ननु भगवतो लीलायां सहचरीत्युक्तम्, यदा करुणया भगवान् रक्षणे प्रवृत्तः तदाऽपि देव्याः सहधर्मचारित्वं वक्तव्यम्-तत् न संभवति । सकलजगदनुग्रहाय क्रियमाणेषु भगवदवतारेषु कथमिव तस्याः साहचर्यम्, तस्या अवताराभावादित्याह—

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य विष्णो-
राचख्युस्त्वां प्रियसहचरीमैकमत्योपपन्नाम् ।
प्रादुर्भावैरपि समतनुः प्राध्वमन्वीयसे त्वं
दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ॥ १० ॥

आपन्नार्तीति । **आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य** बद्धव्रतस्य 'एतद्व्रतं मम' इति स्वयमेवाभिधानात् । दीक्षाशब्दात् आपन्नार्तिप्रशमनमेव क्रतुरिति ध्वनितम् । तत्र च पत्नीसाहित्यमपि आवश्यकमिति वस्त्वन्तरमपि ध्वनितम् । **विष्णोः त्वामैकमत्योपपन्नाम्** एकसंकल्पत्वेनोपपन्नाम् । **प्रियसहचरीम् आचख्युः** शशंसुः । **'अस्येशाना जगतो विष्णुपत्नी' 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'** इत्याद्यागमा इति शेषः । पत्नीशब्दो हि **'पत्युर्नो यज्ञसंयोग'** (पा.सू. ४-१-३३) इति भक्तरक्षादीक्षायां साहचर्यं व्यनक्तीति भावः । अत एवावताराणां भक्तरक्षार्थत्वात् तेष्वपि साहचर्यमस्तीत्याह—**प्रादुर्भावैरिति** । **त्वं प्रादुर्भावैः** प्रादुर्भवत्येभिरिति प्रादुर्भावाः रामकृष्णादिविग्रहाः । करणे घञ्, तैः । **समतनुः** सती अनुरूपविग्रहा सती

'देवत्वे देवदेहेयं मनुष्यत्वे तु मानुषी' । (वि.पु. १-१०-१४५)
'राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी ॥' (वि.पु. १-१०-१४४)

इति स्मरणात् । **प्राध्वम्** आनुकूल्येन । **'आनुकूल्यार्थकं प्राध्वम्'** इत्यमरः । **अन्वीयसे** अविनाभावेन संबध्यसे । **इण् गतौ, कर्मणि यक्** । **दूरोत्क्षिप्तैः** दूरमुत्थितैः । **दुग्धराशेः** क्षीराब्धेः । **तरङ्गैः मधुरतेव** । अत्रोपमालङ्कारः । **दुग्धराशेरिति** भगवतः प्रतिबिम्बं प्रादुर्भावान्तरङ्गाः प्रतिबिम्बाः श्रियश्च मधुरतेति बिम्बप्रतिबिम्बानां साधर्म्याणि व्यापकत्वतदंशत्वसुखजनकत्वानि ॥ १० ॥

एवं देव्याः स्वरूपमुक्तम् । अथ रूपमाह—

धत्ते शोभां हरिमरतके तावकी मूर्तिराद्या
तन्वी तुङ्गस्तनभरनता तप्तजाम्बूनदाभा ।
यस्यां गच्छन्त्युदयविलयैर्नित्यमानन्दसिन्धा-
विच्छावेगोल्लसितलहरी विभ्रमं व्यक्तयस्ते ॥ ११ ॥

धत्त इति । तावकी आद्या मूलभूता । तन्वी तनुः । **'वोतो गुणवचनात्'** (पा.सू. ४-१-४४) इति ङीप् । तनुत्वादेव **तुङ्गस्तनभरनता** । **तप्तजाम्बूनदाभा** तप्तस्वर्णवर्णा । **'हिरण्यवर्णां हरिणीम्'** (श्रीसू.१) इति श्रुतेः । **मूर्तिः हरिमरतके** हरिः मरतक इव तस्मिन् । परवासुदेवस्य वक्षसि इत्याशयः । मूलभूतश्रीव्यक्तेर्मूलभूतभगवद्विग्रहस्थानकत्वौचित्यात् । **शोभां धत्ते** परभागातिशयं पोषयति । स्वतः सुन्दरस्य तस्यापि हरेः शोभातिशयावहसौन्दर्येति, तत एवास्य हृदयङ्गमेति व्यज्यते । तस्याः व्यक्त्यन्तराणि मूलभूतव्यक्तेरुदयन्ति तत्रैव लीयन्त इत्याह—**यस्यामिति** । आनन्दसिन्धौ आनन्दपुञ्जरूपायाम् । यस्याम् मूलभूतमूर्तौ । **उदयविलयैः** व्यक्तयः क्षीरार्णवजनकाध्वरादावुदितदिव्यमङ्गलविग्रहाः । **इच्छावेगोल्लसितलहरी विभ्रमम्** इच्छैव संकल्प एव वेगः तेनोल्लसिताः लहर्यः कल्लोलाः तासां विभ्रमं विलासम् । **गच्छन्ति** प्राप्नुवन्ति । अपरिच्छिन्नानन्दराशिभूतमूलविग्रहांशभूतावतारव्यक्तिनिवहस्सर्वोऽपि आनन्दरूप एवेत्युक्तं भवति । कथमानन्दरूपत्वं विग्रहस्येति चेत्-उच्यते-**'ज्ञानानन्दमया लोका'** इति शुद्धसत्त्वद्रव्यविकाराणां सर्वेषामपि स्वयं प्रकाशत्वेन **'ज्ञानत्वादनुकूलत्वाच्चानन्दमयत्वमपि'** इति न्यायसिद्धाञ्जनादौ स्फुटम् । यथा ईश्वरस्वरूपज्ञानस्य स्वयंप्रकाशत्वेन ज्ञानत्वं **'आनन्द आत्मा'** (तै.उ.) इत्यानन्दत्वं चाभ्युपगतम्, तथा स्वप्रकाशत्वाविशेषादनुकूलत्वाविशेषाच्च सिद्धम् आनन्दरूपत्वं दिव्यमङ्गलविग्रहाणामिति दिक् ॥ ११ ॥

एवमतिसुन्दरानन्दमयदिव्यमङ्गलविग्रहवत्त्वम्

'का चान्या त्वामृते देवि सर्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगिध्येयं गदाभृतः ॥' (वि.पु. १.९.१२२)

इत्यप्राकृतयोगिध्येययज्ञमयहरिमरतकाधिष्ठानकत्वं च प्रतिपाद्य त्वत्संकल्पलेशविषयस्त्रीव्यक्तीनामपि बहु विभूतिमत्त्वं प्रौढतरभर्तृवशीकरणलावण्यातिशयवत्त्वं च दृश्यते। तव किमु वक्तव्यं सौन्दर्यविभूतिमत्त्वस्वाधीनपतिकत्वादावित्याशयादाह—

आसंसारं विततमखिलं वाङ्मयं यद्विभूतिः
यद्भ्रूभङ्गात् कुसुमधनुषः किङ्करो मेरुधन्वा ।

यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥ १२ ॥

आसंसारमिति । आसंसारम् संसारमारभ्य सृष्टिमारभ्य । **विततं** सर्वभुवनेषु विस्तृतम् । **अखिलं वाङ्मयम्** वाग्विकारः, वर्णात्मकशब्दविकारः पदवाक्यात्मकशब्दविकारः । **यद्विभूतिः** यस्याः सरस्वत्याः विभूतिः यदधिष्ठेयम् वाचां देवता हि सा । **मेरुधन्वा** धनुषश्चेत्यनङ्समासान्तः । **यद्भ्रूभङ्गात्** यस्याः गौर्याः भ्रूभङ्गात् विकारविशेषात् । **कुसुमधनुषः 'वा संज्ञायाम्'** (पा.सू. ५.४.१३३) इत्यनङ्विकल्पात् । **किङ्करः** विधेयो भवति । अत्यन्तदृढधन्वा त्रिपुरान्तकः महावीरोऽपि अतिसुकुमारपुष्पायुधस्यापि यद्भ्रूभङ्गसाहाय्यमहिम्ना किंकरोऽभूत्—

'बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति' इति न्यायात् । महेन्द्रः केवलमिन्द्रः, किं तु महत्त्वविशिष्ट इन्द्र, इदि परमैश्वर्ये । **यस्यां** पौलोम्याम् । नित्यं **नयनशतकैः** नेत्रसहस्रेण । **एकलक्ष्यः** एकं लक्ष्यं यस्य सः । अजस्रं विषयान् त्यक्त्वा य़ामेव पश्यन्नास्त इत्यर्थः । **तासां** सरस्वतीपार्वतीन्द्राणीनाम् । असौ **परिणतिः** एवं विधाकारभजनम् । **त्वदीयैः भावलेशैः** भावः अभिप्रायः, संकल्प इति यावत् । त्वसंकल्पलेशतोऽपि विभूतिमत्त्वं स्वाधीनपतिकत्वावहसौन्दर्यातिशयविशिष्टविग्रहवत्त्वं च तासाम्, तव तु विहृतय एताः **'मेधा श्रद्धा सरस्वती'** **'स्त्रीनाम्नि लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम्'** इति तासां त्वद्विभूतित्वस्मरणात् ।

'यद्यद्विभूतिमत् सत्वं श्रीमदूर्जितमेव वा' (गी. १०-४१)

इति गीतोक्तस्य न्यायस्यापि वाच्यत्वादिति भावः ॥ १२ ॥

एवं द्वाभ्यां श्लोकाभ्यां देव्या विग्रहवत्त्वं स्वाधीनपतिकत्वादिप्रयोजकसौन्दर्यातिशयवद्रुद्राणीन्द्राणीप्रभृतिपरिजनवत्त्वेन कैमुत्यसिद्धरूपातिशयवत्त्वं च प्रतिपाद्य तदव्यवहितानन्तरप्रादुर्भावस्वरूपममृतसहोत्पत्तिकत्वं त्रैलोक्यसाम्राज्यपट्टाभिषिक्तत्वं च विवृणोति—

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णा-
मम्भोराशेरधिगतसुधासंप्लवादुत्थितां त्वाम् ।

पुष्पासारस्थगितभुवनैः पुष्कलावर्तकाद्यैः
क्लृप्तारम्भाः कनककलशैरभ्यषिञ्चन् गजेन्द्राः ॥ १३ ॥

अग्र इति । **गजेन्द्राः** ऐरावतपुण्डरीकप्रभृतयः । **अधिगतसुधासंप्लवात्** अधिगतः प्राप्तः, सुधासंप्लवः अमृतप्रवाहः येन । **अम्भोराशेः** क्षीरोदात् । **उत्थिताम्** न तूत्पन्नाम् । सुधासंभवदेवीसंभवयोः यौगपद्योक्त्या माधुर्यातिशयो व्यज्यते । **भर्तुः** उपेन्द्रस्य त्रैलोक्यरक्षार्थमवतीर्णस्य । **अग्रे** पुरस्तात् । **सरसिजमये** पद्मस्वरूपे । **'तत्प्रकृतवचने मयट्'** । **भद्रपीठे** सिंहासने । **निषण्णां त्वां पुष्पासारस्थगितभुवनैः** पुष्पासारः पुष्पवर्षः । **'धारा संपात आसारः'** इत्यमरः । तेन स्थगितम् छादितम् भुवनं यैः । **पुष्कलावर्तकाद्यैः** मेघैः **क्लृप्तारम्भास्सन्तः** क्लृप्तः वर्षारम्भो येषां ते । स्वकर्तृकसुधाभिषेकारम्भस्य मेघकर्तृकपुष्पाभिषेकार्थत्वेनैव क्लृप्तत्वात् आदावुपक्रान्तत्वमिति भावः । **कनककलशैः** कनककलशस्थसुधासारैः । अभ्यषिञ्चन् अभिषिक्तवन्तः । एतेन त्रैलोक्यपट्टाभिषिक्तायाः लोकमातुः

'मामेकां देवदेवस्य महिषीं शरणं व्रजेत्'

इत्युक्तमुपेन्द्रमहिषीत्वम्। सिंहासनमपि तदनुकूलं सुकुमारमिति स्फुरित सुधासहजत्वादुज्जीवकत्वशीतलत्वमधुरगुणत्वस्फूर्तिरपि। अयं च गजेन्द्राभि कवृत्तान्तः श्रीविष्णुपुराणे—'गङ्गाद्याः सरितस्तोयैः स्नानार्थमुपतस्थिरे।

दिग्गजा हेमपात्रस्थमादाय विमलं जलम्॥

स्नापयांचक्रिरे देवीं सर्वलोकमहेश्वरीम्॥' (वि.पु.१.९.१०३)

इति प्रपञ्चितः॥ १३॥

एवमभिषक्तायाः देव्याः **'देवदेवस्य महिषीं शरणं व्रजेत्'** इति विहितप्र रेणानुष्ठितशरणवरणानां गीर्वाणानां रक्षणप्रकारमाह—

आलोक्य त्वाममृतसहजे विष्णुवक्षस्स्थलस्थां
शापाक्रान्ताः शरणमगमन् सावरोधाः सुरेन्द्राः।
लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः
सर्वाकारस्थिरसमुदयां संपदं निर्विशन्ति॥ १४॥

आलोक्येति। **अमृतसहजे** सह जायते प्रादुर्भवतीति सहजा। **जनि प्रादु र्भाव** इति धातुः। **शापाक्रान्ताः** दुर्वासश्शापात् नष्टैश्वर्याः निःश्रीकत्वशापपराभू इत्यर्थः। **सावरोधाः** सान्तःपुराः सुरेन्द्राः। **विष्णुवक्षस्स्थलस्थाम्** अभिषेकानन्त स्नाताभूषणभूषिता **'पश्यतां सर्वदेवानां ययौ वक्षस्स्थलं हरेः'** (वि.पु. १-९-१०) इति हरिवक्षःस्थलमरतकसिंहासननिषण्णाम्। **त्वाम् आलोक्य** भगवत्संश्लेषे प्रसन्नत्वाद्यतिशयध्वनिः। देवतानां मातापितृदर्शनात् [साधनत्व] सनाथत्वप्रती तिरिति भावः। **शरणमगमन्** स्वाभीष्टोपायतया निश्चित्य प्रणेमुः।

'ततः प्रभृति निःश्रीकं सशक्रं भुवनत्रयम्।
मैत्रेयासीदपध्वस्तं संक्षीणौषधिवीरुधम्॥

श्रिया विहीना निस्सत्त्वा देवाश्चक्रुस्ततो रणम्।
विजितास्त्रिदशा दैत्यैरिन्द्राद्याः शरणं ययुः॥' (वि.पु. १.९.३३)

इति स्मरणात्। पुनः सुरेन्द्रा इत्यनुषज्याह—**लब्ध्वेति**। **त्वत्कटाक्षैर्लक्षि तम्** वीक्षितम् ईक्षणमात्रेण समृद्धमखिलम्। **त्रिभुवनं भूयोऽपि लब्ध्वा** पुनः प्राप्य

सर्वकारस्थितिसमुदयाम् शापात् पूर्वमनुभूतानां सर्वाकाराणां तत्तद्भोगोपकरणभोगस्थानप्रकाराणां स्थितिः मर्यादा तस्यास्समुदयः पुनः पादुर्भावः, सर्वाकारस्थितेः समुदयो यस्यां सा। यद्वा स्थितिसमुदयोऽस्यास्तीति मत्वर्थे **अर्शाद्यच्** प्रत्ययः। **सर्वाकारस्थिरसमुदयाम्** इति पाठे तु सर्वप्रकारैः स्थिरः समुदयः अभ्युदयो यस्याः ताम्। **संपदं निर्विशन्ति** इत्यर्थः।

'श्रिया जुष्टं च त्रैलोक्यं बभूव मुनिसत्तम।
शक्रश्च त्रिदशश्रेष्ठः पुनः श्रीमानजायत॥

सिंहासनगतः शक्रः संप्राप्य त्रिदिवं पुनः।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरान्ततः॥' (वि. पु. १.९.११५)

इति च स्मरणात्॥ १४॥

एवं देव्याः स्वरूपं चतुर्दशभिः श्लोकैः प्रतिपाद्य सर्वकल्याणगुणानामाकरं [अग्रेसर] परमोदारत्वं परमकारुणिकत्वक्षमावात्सल्यादिगुणाविनाभूतं **'प्रत्यक्षानुश्रविके'**त्यादिना प्रथमश्लोके सामान्यत उक्तम् ऐश्वर्यकैवल्यमोक्षप्रदत्वरूपेण विशिष्य वक्तुमुपक्रमते **आर्तेत्यादिभिः** पञ्चभिः श्लोकैः। तत्रैश्वर्यार्थी द्विविधः नष्टैश्वर्यः, अनागतैश्वर्यश्च। ऐश्वर्यं च द्विविधम् धनरूपम्, मण्डलाधिपत्यरूपं चेति। तत्र प्रथमं नष्टैश्वर्यस्यार्तस्य रक्षणमाह—

आर्तत्राणव्रतिभिरमृतासारनीलाम्बुवाहैः
अम्भोजानामुषसि मिषतामन्तरङ्गैरपाङ्गैः।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते संपदोघाः॥ १५॥

आर्तत्राणेति। **आर्तत्राणव्रतिभिः** आर्तानां त्राणाम् ऐश्वर्यप्रापणरूपम् तत्र व्रतं तद्वद्भिः। **अमृतासारनीलाम्बुवाहैः** अधिकार्यन्तरेषु अमृतासारः मोक्षवर्षः, अन्यत्र जलवर्षः तस्य नीलाम्बुवाहैः नीलम्बुवाहेति शरन्मेघव्यावृत्तिः। **उषसि** प्रातः। **मिषताम्** उन्मीलितानाम्। **अम्भोजानाम् अन्तरङ्गैः** आप्तैः सदृशैरिति यावत्। **अपाङ्गैः** नेत्रान्तवीक्षणैः। **त्वदीया दृष्टिः यस्यां यस्यां दिशि** दिक्शब्देन दिग्वृत्तिज-

न्तुमात्रं विवक्षितम्, यस्मिन् । **विहरते** यं कंचिदप्यार्तमुपसन्नं स्वपार्श्वदिशि वर्तमा
कटाक्षेण वीक्षते । **तस्यां तस्यां** दिशि **संपदोघाः** संपत्प्रवाहाः **अहमहमिकाम्** अ
पूर्वमुदेष्यामीति यौगपद्येन प्रादुर्भावम् । **तन्वते** कुर्वन्ति । दुर्वासश्शापनष्टैश्वर्य-
शक्रादिरक्षणवृत्तान्तोऽत्र प्रमाणमिति भावः ॥ १५ ॥

अनागतैश्वर्यरक्षणप्रकारमाह—

योगारम्भत्वरितमनसो युष्मदैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम् ।
तेषां भूमेर्धनपतिगृहादम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥ १६ ॥

योगेति । योगारम्भत्वरितमनसः ऐश्वर्यार्थमष्टाङ्गयोगारम्भत्वरितहृदया
सन्तः । **युष्मदैकान्त्ययुक्तम्** युवयोरैकान्त्यं नैयत्यमनन्योपासनप्रयुक्तम् । **धर्मं**
कर्मानुष्ठानम् । **प्राप्तुमिह ये** केचित् । **धनायाम्** धनेच्छाम् । **धारयन्ते तेषां वाञ्छि-**
तानाम् अपेक्षितानाम् । **वसूनाम्** धनानाम् । **धाराः** भूमेः निध्यादिरूपेण । **धनपति-**
गृहात् गुरुदक्षिणार्थकृतरघूपसर्पणकौत्समहर्षेरिव कुबेरभवनात् । **अम्बरात्** व्योम्
कुचेलस्येव । **अम्बुधेर्वा** [वणिगानीत] वायुवेगानीतसमुद्रयानेभ्यः **अधिकमधि-**
कम् वाञ्छितादधिकम् । **निर्यान्ति** आविर्भवन्ति । कुचेलः खलु रुक्मणीवासुदेव-
समाश्रयणेन निरवधिकमैश्वर्यं प्राप्त इति युष्मत्पदमहिम्ना तत्प्राप्तमिति भाति ॥
१६ ॥

मण्डलाधिपत्यलिप्सया त्वत्पादचिन्तकानामपि तत्फलसिद्धिरस्तीत्याह—

श्रेयस्कामाः कमलनिलये चित्रमाम्नायवाचां
चूडापीडं तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छायासुभगशिरसश्चामरस्मेरपार्श्वाः
श्लाघाशब्दश्रवणमुदिताः स्रग्विणः संचरन्ति ॥ १७ ॥

श्रेयस्कामा इति । मण्डलाधिपत्यसार्वभौमत्वादिश्रेयस्कामाः सन्तः 'अत
कृकमी' ति विसर्जनीयस्य सत्वम् । **आम्नायवाचाम्** वेदवाचाम् । **चित्रम्** आश्च-

र्यभूतम् । **चूडापीडम्** चूडायाः शिरसः वेदान्तरूपस्यापि आपीडं शेखरं सौगन्ध्यसौ-
कुमार्यादिना अद्भुतं किमपि शेखरकुसुममिव स्थितम् । **तव पदयुगं चेतसा**
मनसा । **धारयन्तः** हेतौ शता त्वत्पदध्यानादेवेत्यर्थः । **छत्रच्छाया सुभगशिरसः**
मुक्ताखचितातपत्रच्छायया सौभाग्यवन्मूर्धानः । **चामरस्मेरपार्श्वाः** चामरैः स्मेरौ
स्मितवन्तौ पार्श्वौ येषाम् । इतरेषां प्रभावं हसन्ताविव पार्श्वाविति ध्वनिः । **श्लाघाश-**
ब्दश्रवणमुदिताः वंशावली निजापदानबिरुदोद्घोषमुखरवन्दिस्तुतिपाठसंतुष्टाः ।
स्रग्विणः मालाधाराः । **संचरन्ति** गजादिभिरिति शेषः ।

'ब्रह्माद्याश्च सुरास्सर्वे मुनयश्च तपोधनाः ।
एधन्ते त्वत्पदच्छायामाश्रित्य कमलेश्वरी ॥
लोकेशेश विभूतीनां कारणं यन्निरीक्षणम् ॥'

इत्यादिप्रमाणं द्रष्टव्यम् ॥ १७ ॥

एवमैश्वर्यप्रदत्वमुपपाद्य कैवल्यादिमोक्षप्रदत्वमुपपादयितुं प्रक्रममाणः तदु-
भयप्रवृत्तिहेतुभूतकामक्रोधाद्यरिषड्वर्गनिराकरणं, तद्धेतुभूतपापादिनिवर्तनं, सर्व-
कारणभूताद्यविद्याशब्दितप्रकृतिसंबन्धतरणं च स्वामिन्याः दयावलम्बिनामेव
सिद्ध्यतीत्याह । अथवा अनिष्टनिवृत्तिरिष्टप्राप्तिश्चेति द्विविधोऽपि पुरुषार्थः त्वदी-
यदयावलम्बनेन सिद्ध्यतीत्याह—

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
दूरीकर्तुं दुरितनिवहं त्यक्तुमाद्यामविद्याम् ।
अम्ब स्तम्बावधिकजननग्रामसीमान्तरेखा-
मालम्बन्ते विमलमनसो विष्णुकान्ते दयां ते ॥ १८ ॥

ऊरीकर्तुमिति । हे अम्ब **अखिलं कुशलम्** क्षेमम् । **ऊरीकर्तुम्** अङ्गीकर्तुम्,
कुशलशब्देन स्वात्मानन्दानुभवरूपभोगस्यापि क्रोडीकारः । **आदीनरातीन्** काम-
क्रोधादिरूपप्राचीनशत्रूनित्यर्थः । **जेतुं दुरितनिवहम्** पापसमूहम् । **दूरीकर्तुम्** दूरतो
निराकर्तुम्, विद्याद्वारेति शेषः । **आद्यामविद्याम्** मूलप्रकृतिम् । **त्यक्तुम्** तर्तुम् अत्रापि
विद्याद्वारेति योज्यम् । **स्तम्बावधिकजननग्रामसीमान्तरेखाम्** ब्रह्मादिस्तम्बावधि-

कजन्तूनां जननानि जन्मानि तान्येव ग्रामः तस्य सीमायाः अन्तर्वर्तिनी रेखा अनेक संसारग्रामात् ग्रामान्तरप्रापकाभिज्ञानरेखामिव विद्यमानाम् । **ते** तव । **दयाम् आलम्बन्ते** साधनतया स्वीकुर्वन्तीत्यर्थः । दयामेव ते सर्वे श्रेयस्साधनतया स्वीकुर्वन्ति।

'दाराः पुत्रास्तथागारास्सुहृद्धान्यधनादिकम् ।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥
शरीरारोग्यमैश्वर्यमरिपक्षक्षयस्सुखम् ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥

(वि.पु. १-९-१२४, १२५)

सत्येन सत्त्वशौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले ॥
त्वया विलोकितास्सद्यः शीलाद्यैस्सकलैर्गुणैः ॥'

(वि.पु.१-९-१२९, १३०)

इत्यादिस्मरणात् ॥ १८ ॥

एवमैहिकामुष्मिकसकलफलप्रदत्वमुक्त्वा, एतावदखिलमपि प्राकृतफलं तृणीकृत्य, अविद्यातरणरूपसंसारनिवृत्तिकामनामपि विहाय श्रीमन्नारायणसेवामधिकृत्यानन्यप्रयोजनाः भगवच्छरणैकशरणाः—

'यो नित्यमच्युतपदाम्बुजयुग्मरुक्म—
व्यामोहतस्तदितराणि तृणाय मेने'

इति प्रसिद्धाः भगवद्रामानुजार्यादयः तेषामपि देहपतनानन्तरभाविनिरन्तकैङ्कर्यश्रृङ्खलितमिह यावज्जीवं नित्यनैमित्तिकात्मककैङ्कर्यं स्वप्रीतिफलकतया स्वयमेव लक्ष्मीतन्त्रे—

'संग्रहाय च लोकानां मर्यादास्थापनाय च ।
प्रियाय मम विष्णोश्च देवदेवस्य शार्ङ्गिणः ॥

मनीषी वैदिकाचारं मनसाऽपि न लङ्घयेत् ॥'

(ल.त. १७-९५-९६)

इति निर्दिष्टवती भवती, फलकामा मुमुक्षवोऽपि सर्वधर्मत्यागेन विनश्येयुरिति धर्मसेतुं करुणया व्यवस्थापितवतीत्याह—

जाताकाङ्क्षा जननि युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् ॥ १९ ॥

जाताकाङ्क्षेति । हे **जननि युवयोरेकसेवाधिकारे** एकसेवाविशिष्टसेवा स एवाधिकारः फलं तत्र । **जाताकाङ्क्षाः** जातस्पृहाः । **मायालीढम्** मायया प्रकृत्या लीढं संबद्धम्

'मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्'

इति हि श्रुतिः । अखिलं विभवम् ऐश्वर्यम् । **तृणाय मन्यमानाः** तृणमिव नाद्रियमाणाः **'मन्यकर्मण्यनादर'** (पा.सू. २-३-१७) इति चतुर्थी । **विष्णोस्तव च प्रीत्यै, वेलाभङ्गप्रशमनफलम्** शास्त्रीयमर्यादातिलङ्घननिरासकप्रयोजनकम् । **वैदिकम्** श्रुतिस्मृत्यादिविहितम् । **धर्मसेतुम्** य एव सेतुः तम् । **प्रीतिमन्तः भजन्ते** संश्रयन्ते । धर्मस्यापि देशान्तरप्रापकत्वात् सेतुत्वनिरूपणम् ॥ १९ ॥

अथ स्वरूपरूपगुणविशिष्टतया सर्वेश्वरीभावेन च देवीमुपपाद्य, सर्वरक्षणसामर्थ्यकारुण्याभ्यां शरण्यत्वं निश्चित्य प्रथमश्लोक एव पुरुषकारतया तस्याः शरणागतिमनुष्ठास्यन् **'भवति युवां दैवतं दम्पती नः'** इत्युपायशरणागतेरात्मरक्षाभरसमर्पणात्मिकायाः अंशभूतस्वरूपसमर्पणसंप्रदानदेवतात्वमुभयवृत्तीति वचनेन स्वात्मस्वरूपसमर्पणं दर्शयित्वा, रक्षाभरसमर्पणमपि तदुभयसंप्रदानकमिति मन्यमानो विशिष्टान्तःप्रविष्टश्रीशरणागतिमनुतिष्ठति—

सेवे देवि त्रिदशमहिलामौलिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां संपदां पादपद्मम् ।

यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं

वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २० ॥

सेव इति । न्यासतिलके '**अनादेर्निस्सीम्नः**, (श्लो.३) इति श्लोके पुरुषकारशरणागतिम्, लक्ष्मीतन्त्रे

'**मामेकां देवदेवस्य महिषीं शरणं व्रजेत्**' (ल.त. १७-१०३)

इति विहितां '**भगवन्नारायणे**'ति भाष्याकारानुष्ठितां स्वयमप्यनुष्ठाय गद्यान्ते तदनुष्ठितां '**श्रीमन्नारायणाये**'ति विशिष्टशरणागतिमपि '**महेन्द्राग्नाविष्विव**' (न्या.ति.श्लो ४) ति द्वितीयश्लोके

'**प्रपत्तव्ये तत्त्वे परिणमित वैशिष्ट्यविभवां**' (न्या.ति.श्लो-४)

'**श्रियं शीतापाङ्गामहमशरणो यामि शरणम्**' । (न्या.ति.श्लो ४)

इति विशेषणभूतश्रीगोचरामपि अन्वतिष्ठन्नाचार्या इति अत्रापि तन्न्यायो द्रष्टव्यः । हे **देवि शमितविपदाम्** शमिताः विपदो यासु । **संपदाम्** ऐश्वर्याणाम् । **सिद्धिक्षेत्रम्** उत्पत्तिभूमिम्, अनिष्टनिवृत्ति-इष्टप्राप्त्योरुत्पत्तिभूमिमित्यर्थः । **त्रिदशमहिलामौलिमालार्चितम्** देवस्त्रीमौलिगतमालाभिरर्चितं पूजितम् एतेन देव्याः परत्वं सूचितम् । **ते पादपद्मं सेवे** उपायतया सेवे । शरणं प्रपद्य इत्यर्थः । शिरसा सेवे इति वाऽर्थः । अत एवास्य शिरसा सेवनस्य मोक्षसाधनत्वमस्तीत्याह-**यस्मिन्** इत्यादि । **यस्मिन्** पादपद्मे (ईषत्) अष्टाङ्गद्वादशाङ्गादिप्रणामलक्षणपर्यायेण '**यथा तथा वाऽपि सकृत् कृतोऽञ्जलिः**' (स्तो.र. ३१) इति न्यायेन, अमनस्कतया कृतमपि शिरोनमनं मोक्षाय कल्पत इति भावः । **नमितशिरसः** पित्रादिना नमितं शिरो येषां ते । भक्त्या स्वेच्छयाऽपि नमितशिरसां किमु वक्तव्यमिति भावः । एतेनाचार्यनिष्ठारूपापि प्रपत्तिः सूचिता । **धन्याः** परिपक्वसुकृताः । **शरीरं यापयित्वा** '**एतद्देहावसान**' (न्या.ति. ४) इति क्रोडीकारात् । तदेव शरीरं चरममित्येकवचनाभिप्रायः । अभ्युपगतप्रारब्धकर्मानुभवेन । **वासुदेवस्य वितमसि** विगतप्रकृतिसंबन्धे '**अक्षरं तमसि लीयत**' इति तमश्शब्दो हि प्रकृतौ प्रसिद्धः । तमोगुणरहित इति वाऽर्थः । शुद्धसत्त्वरूप इत्याशयः । **पदे** परमपदे । **वर्तिष्यन्ते** यावत्कालतत्त्वमिति शेषः । न पुनरावर्तन्त इति भावः ॥ २० ॥

एवं क्रियमाणायाः प्रपत्तेरधिकारं आकिंचन्यरूपकार्पण्यगोप्तृत्ववरणाद्यङ्गपौष्कल्यं च दर्शयति—

सानुप्रासप्रकटितदयैः सान्द्रवात्सल्यदिग्धैः

अम्ब स्निग्धैरमृतलहरी लब्धसब्रह्मचर्यैः ।

घर्मे तापत्रयविरचिते गाढतप्तं क्षणं मा-

माकिञ्चन्यग्लपितमनघैरार्द्रयेथाः कटाक्षैः ॥ २१ ॥

सानुप्रासेति । सानुप्रासप्रकटितदयैः अनुप्रासेन आवृत्त्या सहितम्, पौनःपुन्येन सहितं यथा भवति तथा प्रकटिता प्रकाशिता, दया निरुपाधिकपरदुःखप्रहाणेच्छा यैः । यद्यप्यनुप्रासो वर्णावृत्तिवाची, तथाप्यावृत्तिमात्रेऽप्युपचारेण

'**वितरतु भवतां वीप्सयाऽभीप्सितानि**' (सु. श. श्लो. १)

इत्यादौ वीप्साशब्दवत् वर्तत इति ज्ञेयम् । **सान्द्रवात्सल्यदिग्धैः** सान्द्रं निरन्तरं च तत् वात्सल्यं च दोषादर्शित्वम्, वत्सलायाः धेनोर्वत्सगोचरप्रेमवत् देव्याश्चास्मासु यत्तादृशं प्रेमाऽस्ति तदेव वात्सल्यशब्दार्थः । तत्कार्यत्वात् दोषादर्शित्वस्य तेन दिग्धैः आलिप्तैः वात्सल्ये चन्दनकर्पूरद्रव्यादिशीतलद्रव्यसादृश्यमनेन द्योतितम् । **स्निग्धैः** स्नेहयुक्तैः, पुत्रमित्रादिगोचरः प्रणयो हि स्नेहतया व्यपदिश्यते । **अमृतलहरीलब्धसब्रह्मचर्यैः** सुधाप्रवाहेण समं लब्धं सब्रह्मर्यं यैः, आत्मोज्जीवनविद्याभ्यासे समानब्रह्मचारित्वमिति भावः । **अनघैः** उपेक्षारूपाघगन्धरहितैः । **कटाक्षैः** नेत्रान्तवीक्षणैः । **तापत्रयविरचिते** आध्यात्मिकादिरूपतापत्रयविहिते । **घर्मे** ऊष्मणि । **गाढतप्तं** दृढतापयुक्तम् । **आकिञ्चन्यग्लपितम्** आकिञ्चन्येनोपायान्तरदारिद्र्यरूपेण ग्लपितम् । माम् आर्द्रयेथाः आर्द्रं कुरु, यथा तापत्रयादिपीडा शाम्यति तथा विलोकयेत्यर्थः । **आद्रियेथा** इति पाठे तु कटाक्षैराद्रियस्व । यथा तापत्रयं व्यपैति तथाऽऽद्रियेथा इत्यर्थः । घर्मतप्तस्य यथा अमृतवर्षैः तापशान्तिः तद्वदिति उपमालङ्कारध्वनिः । आकिंचन्यग्लपितमित्यधिकारसूचनम् । **घर्मे तापत्रयविरचित** इत्या-

दिना कार्पण्यव्यञ्जनम् । **आद्रियेथा** इति गोप्तृत्ववरणस्फूर्तिः । **अम्बेति** संबुद्ध्या दयावात्सल्यादिकीर्तनेन महाविश्वासोऽपि स्वस्यास्तीति द्योत्यते । एवमानुकूल्यसंकल्पप्रातिकूल्यवर्जनयोरप्यर्थसिद्धत्वं ज्ञेयम् । एवं पञ्चाङ्गपौष्कल्यमाविष्कृतम् ॥२१ ॥

अथोपायानुष्ठानादूर्ध्वं मम प्रार्थनीयं न किंचिदस्ति । मोक्षसाधनस्य प्रपदनस्यानुष्ठितत्वात् । नापि भक्तिः प्रार्थनीया, साधनभक्तेरनार्जनीयत्वात् । स्वयंप्रयोजनभूता भक्तिस्तु त्वत्प्रसादादेव सिद्धा । यावज्जीवमिह वृत्त्यर्थं धनादिकं च न प्रार्थनीयमित्याह—

संपद्यन्ते भवभयतमी भा[नव] स्वतस्त्वत्प्रसादात्
भावाः सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतः शीतलोदारशीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥ २२ ॥

संपद्यन्त इति । **भवभयतमीभास्वान्** संसारभयरात्रिसूर्य इत्यर्थः । तस्मात् । **त्वत्प्रसादात्** उपायानुष्ठानानन्तरभाविनः तव प्रसादात् । **सर्वे भावाः** अभिप्रायाः सर्वा मनोवृत्तय इत्यर्थः । **हरौ भक्तिमुद्वेलयन्तः** उन्मर्यादयन्तः **संपद्यन्ते** । यद्वा **भावाः** भगवच्छरीरतया प्रतिसन्धीयमानाः पदार्थाः सर्वेऽपि । **त्वत्प्रसादात् हरौ भक्तिमुद्वेलयन्तः संपद्यन्ते** उत्तरङ्गयन्तीत्यर्थः । **भवभयतमी भानव** इति पाठे तु **त्वत्प्रसादात् सर्वे** पदार्थाः **भक्तिमुद्वेलयन्तः भवभयतमीभानवः संपद्यन्ते** । अतो भक्तिप्रार्थनमपि न मया कर्तव्यमित्यर्थः । **अहमिह** जीवनार्थम् । **त्वां** धनादिकम् । **किं याचे** किमर्थं याचे । यतः यस्मात् **शीतलोदारशीला** शीतलं दयाशीतलं उदारं सकलार्थप्रदं शीलं स्वभावं यस्याः सा । महतां **मङ्गलानां प्रबन्धान्** समूहान् । **भूयो भूयः** पुनःपुनः । **दिशशि** ददासि । वृत्त्यर्थमपेक्षितानि वसूनि, विहितानां कर्मणां शक्यानामाचरणम्, निषिद्धेभ्यः परनिन्दापरद्रव्यादिहरणादिभ्यो वैमुख्यम्, भगवद्भागवतकैङ्कर्याणि, पाञ्चकालिकमर्यादयाऽनुष्ठानम्, व्याध्यादिना प्रतिबन्धाभावः इत्यादीनि महान्ति मङ्गलानि ददासि । चरमदशायाम् अन्तिमस्मरणसुषुम्णाप्रवेशार्चिरादिगमनविरजातरणमानवस्पर्शनभगवत्प्राप्त्यन्तानि महान्ति मङ्गलानि च तत्तदवसरेषु स्वयमेव करिष्यसि । तस्मात् न किंचिदहं प्रार्थय इत्याशयः ॥ २२ ॥

तर्हि किमन्यत् तव प्रियमिति देव्याः प्रश्नमुत्प्रेक्ष्य प्रत्युत्तरमाह—

माता देवि त्वमसि भगवान् वासुदेवः पिता मे
जातस्सोऽहं जननि युवयोरेकलक्ष्यं दयायाः ।
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥ २३ ॥

मातेति । हे कमले **त्वं मे माता असि, वासुदेवः पिता सः** तादृशानादितापत्रयातुरः । **अहं युवयोः दयायाः एकलक्ष्यं जातः** युवयोरेकदयापात्रमस्मीत्यर्थः । अनादौ संसारे तापत्रयमातुरं मामवलोक्य भवतोर्दयोदयात्

'ईश्वरस्य च सौहार्दं यदृच्छा सुकृतं तथा ।
विष्णोः कटाक्षमद्वेषमाभिमुख्यं च सात्त्विकैः ॥
संभाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः ॥'

इति पूर्णो देशिकानुपसन्नोऽस्मि । देशिकैश्च त्वत्परिजनतया दत्तोऽस्मीत्याह **दत्त** इति । देशिकैरपि युष्मत्परिजनतया युवयोः किङ्करतया दत्तः अतो मत्प्रसादान्मोक्षार्थशरणागतिरपि ते सिद्धा । **किं ते भूयः प्रियम्** त्वदभिप्रायस्थितं वाञ्छितम् । इति **स्मेरवक्त्रा** अन्तस्स्मितमुखी । **विभासि** द्योतसे ॥ २३ ॥

एवं मत्प्राप्त्यर्थं त्वरा न कर्तव्या, मम संकल्पात् भूतले यदर्थमवतीर्णोऽसि तत्कार्यनिवृत्तिपर्यन्तमत्रैव श्रीरङ्गे सुखमास्व । दुर्मतानि त्वया निरसनीयानि, मद्विषयकाः प्रबन्धाः भूयो भूयः प्रवर्तनीयाः, अतः क्षिप्रमवतारसमाप्तिकामनां विना अन्यत्प्रियमस्ति चेत् ब्रूहीति मातुः हृदयमालोच्य

'धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि ।
प्रश्रिते दानशीले च सदैव निवसाम्यहम् ॥'

इति त्वदुक्तप्रकारेण त्वया यावज्जीवमिहावस्थानेऽपि संनिधातव्यमिति प्रार्थयते—

कल्याणानामविकलनिधिः कापि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला।

संपद्दिव्या मधुविजयिनः संनिधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थना कामधेनुः ॥ २४ ॥

कल्याणानामिति। **कल्याणानाम्** मङ्गलानाम्। **अविकलनिधिः** **कापि** वाङ्मनसानास्पदभूता। **कारुण्यसीमा** कारुण्यभूमिः। **नित्यामोदा** नित्यं सदा आमोदः आनन्दः यस्याः सा। आश्रितानामामोदो ययेति वा। **निगमवचसाम्** वेदवाचाम्। **मौलिमन्दारमाला** मौलेः शिरसः मन्दारमाला मन्दारपुष्पमयी माला वेदान्तप्रतिपाद्येत्यर्थः। **मधुविजयिनः** विष्णोः। **दिव्या संपत्** अतिशयिता संपत्। **सकलभुवनप्रार्थनाकामधेनुः** भुवनशब्देन भुवनस्थजना लक्षिताः, सकलजनप्रार्थनाकामधेनुः प्रार्थनाशब्देन प्रार्थनाविषयो लक्ष्यते, तस्य कामधेनुः तत्प्रदाने कामधेनुरित्यर्थः। सा पूर्वोक्तकल्याणगुणाकरतया प्रसिद्धा। एषा एवंविधदिव्यमङ्गलविग्रहा। **देवी सदा मे** मह्यम्। **संनिधत्ताम्** संनिधानं करोत्विति प्रार्थना। मातुस्संनिधाने हि प्रजायाः पुष्टिरिति भावः ॥ २९ ॥

स्वग्रन्थस्य विश्वसनीयत्वाय स्वनाम प्रकटयन् स्वकृतस्तोत्रपठनस्य फलमाह—

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्
कलिकलुषनिवृत्त्यै कल्पमानं प्रजानाम्।

सरसिजनिलयायाः स्तोत्रमेतत् पठन्तः
सकलकुशलसीमाः सार्वभौमा भवन्ति ॥ २५ ॥

उपचितेति। उपचितगुरुभक्तेः उपचिता अभिवर्धिता गुरुभक्तिः येन तस्मात्। **वेङ्कटेशात् उत्थितं प्रजानाम्** जनानाम्। **कलिकलुषनिवृत्त्यै** कलिजनितः यः कलुषः पापादिः तन्नाशाय। **कल्पमानम् एतत् सरसिजनिलयायाः** कमलालयायाः। **स्तोत्रं पठन्तः** पुरुषाः। **सकलकुशलसीमाः** अखिलमङ्गलभूमयः। **सार्वभौमाः** सर्वोत्कृष्टाः **भवन्ति** ॥ २५ ॥

बालस्य मेऽग्रजो भ्राता पितामह इवापरः।
सारज्ञः सुन्दराचार्यः संप्रदायानुपादिशत् ॥

क इह निगमचूडाचार्यसूक्तौ निगूढं
करबदरयिता स्यां मां विना साहसिक्यात्।
निधिमिव जननान्धो निर्भयो वा तथापि
प्रतिभुव इव यन्मे देशिका दर्शयन्तु ॥

इत्यात्रेयकुलतिलकवरदाचार्यस्य कृतिषु श्रीस्तुतिव्याख्या संपूर्णा ॥

श्रीस्तुतिश्लोकपादसूची

	पृष्ठम्	श्लोकः
अग्रे भर्तुः सरसिजमये	२७	१३
अम्ब स्तम्बावधिकजनन	३१	१८
अम्ब स्निग्धैरमृत	३५	२१
अम्भोजानामुषसि	२९	१५
अम्भोराशेरधिगत	२७	१३
अस्येशाना त्वमसि	१९	८
आकिञ्चन्यग्लपित	३५	२१
आचख्युस्त्वां	२४	१०
आपन्नार्तिप्रशमनविधौ	२४	१०
आर्तत्राणव्रतिभिः	२९	१५
आलम्बन्ते विमलमनसो	३१	८
आलोक्य त्वाममृतसहजे	२८	१४
आविर्भावः कलशजलधौ	५	२
आसंसारं विततमखिलं	२६	१२
इच्छावेगोल्लसितलहरी	२५	११
उद्देश्यत्वं जननि	१५	६

उपचितगुरुभक्तेः	३८	२५
ऊरीकर्तुं कुशलमखिलं	३१	१८
कलिकलुषनिवृत्त्यै	३८	२५
कल्याणानामविकलनिधिः	३८	२४
किं ते भूयः प्रियमिति	३७	२३
किं तैरन्तः कलहमलिनैः	२१	९
क्लृप्तारम्भाः कनककलशैः	२७	१३
घर्मे तापत्रयविरचिते	३५	२१
चूडापीडं तव पदयुगं	३०	१७
छत्रच्छायासुभगशिरसः	३०	१७
जन्मस्थेमप्रलयरचना	८	४
जातस्सोऽहं जननि युवयोः	३७	२३
जाताकाङ्क्षा जननि	३३	१९
तत्कल्याणं किमपि	८	४
तन्वी तुङ्गस्तनभरनता	२५	११
तस्यां तस्यामहमिकां	२९	१५
तामेव त्वामनितरगतिः	७	३
तेषां भूमेर्धनपतिगृहान्	३०	१६
त्वत्संप्रीत्यै विहरति हरौ	२१	९
त्वामेवाहुः कतिचिदपरे	२१	९
दत्तो युष्मत्परिजनतया ---	३७	२३
दूरीकर्तुं दुरितमखिलं	३१	१८

दूरोत्क्षिप्तैरिव मधुरता	२४	१०
धत्ते शोभां हरिमरकते	२५	११
धर्मं प्राप्तुं प्रथममिह	३०	१६
धारा निर्यान्त्यधिकमधिकं	३०	१६
नावच्छेदं भजति महिमा	१५	६
नावर्तन्ते दुरितपवनप्रेरिते	१९	८
नित्यामोदा निगमवचसां	३८	२४
निष्प्रत्यूहप्रणयघटितं	११	५
पद्मे तासां परिणतिरसौ	२६	१२
पद्मे पत्युस्तव च निगमैः	१५	६
पश्यन्तीषु श्रुतिषु परितः	१७	७
पुष्पासारस्थगितभुवनैः	२७	१३
पूर्णं तेजस्स्फुरति	८	४
प्रत्यक्षानुश्रविकमहिम	१	१
प्रत्यग्रूपे हविषि	१५	६
प्रादुर्भावैरपि समतनुः	२४	१०
प्रीत्यै विष्णोस्तव	३३	१९
ब्रह्मेशाद्या दधति	१७	७
भावारूढौ भगवति	२१	९
भावास्सर्वे भगवति	३६	२२
भूमा यस्या भुवनमखिलं	५	२
भूयो भूयो दिशसि	३६	२२

मध्येकृत्य त्रिगुणफलकं	१७	७
माता देवि त्वमसि	३७	२३
मानातीतप्रथितविभवां	१	१
मायालीढं विभवमखिलं	३३	१९
यत्संकल्पाद् भवति कमले	८	४
यद्भ्रूभङ्गात् कुसुमधनुषः	२६	१२
यन्नामानि श्रुतिपरिपणानि	१९	८
यस्मिन्नीषन्नमितशिरसो	३४	२०
यस्यां गच्छन्त्युदयविलयैः	२५	११
यस्यां नित्यं नयनशतकैः	२६	१२
यस्यां यस्यां दिशि	२९	१५
याचे किं त्वामहमिह	३६	२२
योगारम्भत्वरितमनसो	३०	१६
लक्ष्मीः पद्माजलधितनया	१९	८
लब्ध्वा भूयस्त्रिभुवनमिदं	२८	१४
वक्षः पीठीं मधुविजयिनो	१	१
वर्तिष्यन्ते वितमसि पदे	३४	२०
विश्वाधीशप्रणयिनि सदा	१७	७
विष्णुस्त्वं चेत्यनवधिगुणं	११	५
वेलाभङ्गप्रशमनफलं	३३	१९
शापाक्रान्ताः शरणमगमन्	२९	१४
शेषश्चित्तं विमलमनसां	११	५

श्रेयस्कामा: कमलनिलये	३०	१७
श्रेयोमूर्तिं श्रियमशरण:	१	१
श्लाघाशब्दश्रवणमुदिता:	३०	१७
सकलकुशलसीमा:	३८	२५
सरसिजनिलायाया:	३८	२५
सर्वाकारस्थिरसमुदयां	२८	१४
संपद्दिव्या मधुविजयिन:	३८	२४
संपद्यन्ते भवभयतमी	३६	२२
संपद्यन्ते विहरणविधौ	११	५
सानुप्रासप्रकटितदयै:	३५	२१
सिद्धारम्भस्सकलभुवन	७	३
सिद्धिक्षेत्रं शमितविपदां	३३	२०
सेवे देवि त्रिदश	३३	२०
सेवापेक्षा तव चरणयो:	७	३
सैषा देवी सकलभुवन	३८	२४
स्तोकप्रज्ञैरनवधिगुणा	५	२
स्तोतव्यत्वं दिशति भवती	७	३
स्थानं यस्यास्सरसिजवनं	५	२

श्रीस्तुतिव्याख्यायां प्रमाणतयोद्धृतानां ग्रन्थतत्कर्तृवचनानां सूची

	पृष्ठम्	पङ्क्ति:
अकारेणोच्यते	१६	१९
अक्षरं तमसि लीयते	३४	२२
अकिञ्चनोऽनन्यगति:	२	२२
अजायमानो बहुधा	१०	८
अत: कृकमिक	३०	२३
अथ यदत: परो	९	११
अध्यात्मत्वादित्वात् ठञ्	४	८
अध्यास्ते देवदेवस्य	२६	३
अनन्या राघवेणाहं	१२	११
अनन्या हि मया	१२	१२
अनादेर्निस्सीम्न:	३४	३
अन्येषु चावतारेषु	२४	२३
अप्रमेयं हि तत्तेजो	४	२
अमर:	१९	२६
	२४	२४

अमरः	२७	१८
अर्थो विष्णुरियं	१३	९
अर्श आद्यच्	२९	३
अव रक्षणे	१६	१४
असदेवेदमग्र आसीत्	९	१५
असंख्येयकल्याणगुण	१	११
अस्या देव्या	१५	२५
"	१२	९
अस्या मम च	१२	७
"	२२	६
अस्येशानो जगतो	११	१२
"	१८	२२
"	१९	६
"	१९	१३
"	२४	१६
अस्येशा जगतः	२२	६
अष्टश्लोक्याम्	२३	१६
अहमस्म्यपराधानां	२	२१
अहिर्बुध्न्यवचनेन	१६	५
आक्रम्य सर्वा तु	२२	७
आज्याहुतिरसौ	१३	१३
आत्मा वेदमग्र	९	१६

आनन्द आत्मा	२५	२४
आनन्दवल्ल्यादौ	१७	५
आनुकूल्यार्थकं प्राध्वं	२४	२४
आर्तो जिज्ञासुरर्थार्थी	२	१०
आविरिञ्चादमङ्गलं	९	६
इच्छा श्रीर्भगवान्	१३	१२
इण् गतौ	२४	२५
इति श्रुतिशिरः	१२	८
इदि परमैश्वर्ये	२६	२०
ईशान	१९	२१
ईशाना देवी	२२	५
ईशानां जगतामधीश	२३	१७
ईशानो भूतभव्यस्य	१८	२२
"	१९	१३
ईश्वरस्य च सौहार्दं	३७	११
ईश्वरी सर्वभूतानां	२३	३
ईश्वरीं सर्वभूतानां	२२	५
इष्टे कश्चित्	९	२५
उद्धृता विष्णुना	१६	२०
उपाये गृहरक्षित्रोः	२	१९
उभयाधिष्ठानं	१६	५
एकैकगुणावधीप्सया	१६	९

एको ह वै नारायण	९	१८
एकोऽहं भवती	१०	१३
एतदेदेहावसाने	३४	२०
एधन्ते त्वत्पदच्छायां	३१	९
ऐहिकामुष्मिकं	२०	२१
ओमित्यात्मानं युञ्जीत	१५	२२
का चान्या त्वामृते	२६	२
कान्तिर्लावण्यमर्चिः	५	३
कारणं तु ध्येयः	९	९
किं वाऽत्र	१३	२३
क्रीडेयं खलु	१७	१७
क्षिप्रप्रसादिनीं	१५	११
गङ्गाद्यास्सरितः	२८	३
गद्यादौ	१	९
गुणतश्च स्वरूपेण	११	२४
गुणाद्रूपगुणाच्चापि	५	१
गुणानां च परार्थत्वात्	१९	१०
जनि प्रादुर्भावे	२८	१३
जन्माद्यस्य यतः	११	४
जायापत्योर्न	१९	१६
जिदृक्षिविश्रिः	३	२४
जुष प्रीतिसेवनयोः	१२	१९

ज्योतिष्मत्यमृतस्वाहा	२०	१३
ज्योत्स्नेव हिमदीधितेः	२१	२१
ज्ञानत्वादनुकूलत्वात्	२५	२३
ज्ञानानन्दमयालोका	२५	२१
तत्पादभक्ति	८	५
तत्सृष्ट्वा तदेवानुप्राविशत्	८	२५
तथाऽप्यनन्यसाधारणं	१४	४
तथा भूमिश्च	१४	५
तथा लक्ष्म्याः	११	२३
तथा स्थिता त्वं	२२	८
तदन्तर्भावात्त्वां	१७	३
तदैक्षत बहुस्यां	८	१९
तया व्याप्तं	१२	२
तव श्रिया	१५	१
तस्याश्च जगतश्चाह	१२	६
तेनेयं स च	१२	१०
त्यज्यन्ते ते नराः	३२	१०
त्वद्वल्लभोऽपि प्रभुः	६	४
त्वया च विष्णुना	२२	४
»	२३	४
त्वया विलोकिता	३२	११
त्वयैतद्विष्णुना	२१	२३

त्वं यादृशोऽपि	२१	८
त्वं लज्जसे	४	४
त्वां मातरं च	२१	१२
दारान् वदन्ति	२१	९
दाराः पुत्रास्तथागाराः	३२	५
दारिद्र्यं नश्यते	२०	२२
दिग्गजा हेमपात्रस्थं	२८	४
दिव्यो देवो एको	१२	१९
दूषयन्ती सुभूतिः	१९	१८
देवत्वे देवदेहेयं	२४	२१
देवदेवस्य महिषीं	२८	७
देवराज्ये स्थितो	२४	९
देवि त्वन्महिमावधिः	६	५
देवि त्वामनुनीलया	१४	९
धर्मनित्ये महाबुद्धौ	३७	२२
धारा संपात आसारः	२७	१८
न ते वर्णयितुं	६	६
नरनारीमयो हरिः	२१	७
न सन्न चासत्	९	५
”	९	१८
नारायणात्मिका देवी	२१	७
निगमानुश्रवावपि	४	८

नित्यैवैषा	१२	१७
निस्सरन्त्यचिरेणैव	२०	१०
नीवी परिपणं	१९	२६
न्यायसिद्धाञ्जनादौ	२५	२३
न्यासतिलके	३४	३
पत्नी हि पारीण ह्यस्येशे	१९	१५
पत्युर्नो यज्ञसंयोगे	२४	१७
परनिर्वाणदायिनी	२०	११
पराशरेण	१३	६
पवित्राणां पवित्रं यो	३	१३
पश्यतां सर्वदेवानां	१०	२
	२८	१६
पुंप्रधानेश्वरेश्वरीं	२१	१७
पुंयोगादाख्यायां	२२	२
प्रपत्तव्ये तत्त्वे	३४	९
प्रशकनबल	१३	१
प्रश्रिते दानशीले च	३७	२३
प्रियाय मम विष्णोश्च	३२	२२
बहोर्लोपो भू च बहोः	६	२३
ब्रह्मकाश्यपीयादि	२१	८
ब्रह्मणे त्वा महस	१७	१
ब्रह्मविष्णुरुद्रेन्द्राः	१०	१७

ब्रह्म वेदमग्र आसीत्	९	१६
ब्रह्माद्याश्च सुरास्सर्वे	३१	८
ब्रह्मा विष्णुः	१३	२२
ब्राह्मपुराणे	२१	२१
बृहत्सहायः कार्यान्तं	२६	१९
बोधो विष्णुरियं	१३	१०
भगवद्रामानुजाचार्याः	३२	१८
भगवन्नारायण	१	९
"	५	१७
"	२४	१
"	३४	६
भट्टाचार्यसूक्तिः	२३	२५
भट्टाचार्यैः	१४	८
भट्टार्यैः	२३	१५
भवगङ्गापहारिणी	२०	१३
भवती संबन्धदृष्ट्या	१०	१४
भवत्येतन्महाभागे	३२	६
भवान्नारायणो	१४	१२
भाष्यकारेण	१	९
"	२३	२६
भोगदा मुक्तिदायिनी	२०	११
भोगप्रिया भोगवती	१५	७

मकारस्तु तयोर्दासः	१६	२१
"	२३	१९
मच्छेषभूता	१२	५
मध्ये पदे निवचने च	१८	९
मनीषी वैदिकाचारं	३३	१
मन्यकर्मण्यनादर	३३	१३
मम लक्ष्म्याश्च	१२	४
मया व्याप्ता	१२	३
महेन्द्राग्नाविष्णु	३४	७
मामेकं शरणं	२३	१४
मामेकां देवदेवस्य	२७	२३
"	३४	५
मामेवैष्यसि	२३	२३
माया तु प्रकृतिं	३३	११
मायाविभक्त	२१	११
मेधा श्रद्धा सरस्वती	४	१७
"	२७	१
मैत्रेय केशवस्सूर्य	१३	१७
मोदते भगवान्	१७	१३
यज्ञविद्या महाविद्या	४	१३
यतो वाचो निवर्तन्ते	३	८
"	१७	५

यतो वाचो निवर्तन्ते	१७	१०
यथा तथा वाऽपि	३४	१७
यथात्मानं हि	१४	६
यथा मया	१२	१
यथा सर्वगतो	१३	८
"	२२	९
यद्यद्विभूतिमत्सर्वं	२७	३
यमश्चक्रधरः	१३	२१
यश्चैतत्	२०	१९
यस्य पृथिवी शरीरं	८	१५
यस्यात्मा शरीरं	८	१५
यस्यापश्शरीरं	८	१५
यस्याव्यक्तं शरीरं	८	१४
यामालम्ब्य	२०	९
यामुनाचार्यैः	४	२१
यो नित्यमच्युतपदाम्बुज	३२	१६
रक्षकस्सर्वसिद्धान्ते	१६	१७
राघवत्वेऽभवत्सीता	२४	२२
रूपकातिशयोक्तिस्स्यात्	१८	१५
लक्ष्मीतन्त्रे	३२	२०
"	३४	४
लक्ष्मीनामसहस्रस्य	२०	१६

लक्ष्मीनारायणाख्यं	१४	१३
लक्ष्मीस्वरूपं	१३	२०
लक्ष्म्या सह हृषीकेशो	१६	१६
लक्ष्म्यास्समस्त	१६	३
"	२२	८
"	२३	४
"	२३	५
लीलाजगत्पतेस्तस्य	१७	१२
लोकवत्तु लीलाकैवल्यं	१७	१४
"	१७	२४
लोकेशेश विभूतीनां	३१	१०
वसुरण्यो विभूरसि	१५	१४
"	१६	२३
वाचः परं प्रार्थयिता	२०	७
वा संज्ञायां	२६	१६
वितरतु भवतां	३५	१२
विमुक्तिफलदायिनी	२०	१३
विष्णुनामसहस्रस्य	२०	१६
विष्णुपत्नी	१९	२१
विष्णुः पितृगणः	१३	१८
विष्णुपुराणे	१२	१६
"	१३	६

विष्णुपुराणे	२१	२३
„	२८	३
विष्णोः कटाक्षं	३७	१२
विष्णोर्नामसहस्रं	२०	१५
वेणीसंहारे	१०	१३
वेदान्तास्तत्त्वचिन्तां	१०	१
वोतो गुणवचनात्	२५	९
शङ्करो भगवान्	१३	१६
शब्दार्णवे	४	८
शरीरारोग्यमैश्वर्यं	३२	८
शशाङ्कः श्रीधरः	१३	१९
शुचिस्समाहितो	२०	२०
शृणुष्वावहितो	२०	१८
श्रयते च परं पदं	५	५
श्रिणाति निखिलान्	५	९
श्रियं लोके	४	४
„	१२	१८
श्रियं शीतापाङ्गं	३४	१०
श्रियः श्रियं	३	२६
श्रिया जुष्टं च	२९	६
श्रीगुणरत्नकोशे	१०	१५
„	१२	२४

श्रीमन्नारायण	२४	२
„	३४	७
श्रीयते चाखिलैर्नित्यं	५	८
„	५	१४
श्रीवत्सचिह्नमिश्र	१७	१८
श्रीसहस्रनाम	१५	८
श्रीः श्रियः	१५	१
श्रीसूक्ते	१२	१८
श्रेयो न ह्यरविन्द	४	१९
स एको ब्रह्मण	१६	१७
सकृद्विभाता	२०	१२
सत्येन सत्त्वशौचाभ्यां	३२	९
सत्समृद्धिं च युक्तां	२	१
सदा तवैव	३	२६
सदेव सोम्येदमग्र	९	१४
सनत्कुमारसंहितायां	२०	१७
सर्वकामप्रदां	१५	१०
सर्वमङ्गलमाङ्गल्या	३	१७
स श्लाघ्यः स गुणी	७	१८
संग्रहाय च लोकानां	३२	२१
संभाषणं षडेतानि	३७	१३
संसारार्णवतारिणीं	२०	७

सामस्वरूपी	१३	१४
सिंहासनगतश्शक्रः	२९	८
सूत्रकृता	१७	२४
स्त्रीनाम्नी लक्ष्मीः	२७	१
स्नापयांचक्रिरे देवीं	२८	५
स्मृतेः	१९	१६
स्रष्टा विष्णुरियं	१३	११
स्वरूपतस्तु	१४	७
"	१९	२३
स्वायम्भुववचनात्	१५	१२
स्वाहालक्ष्मीः	१३	१५
हिरण्यगर्भस्समवर्तत	९	१७
हिरण्यवर्णां हरिणीं	२५	११
ह्रीश्च ते लक्ष्मीश्च	९	२२
"	११	११
"	२१	२२
"	२४	१६

श्रीमते हयवदनपरब्रह्मणे नमः

श्रीमन्निगमान्तमहादेशिकविरचितं सुदर्शनाष्टकम्

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

प्रतिभटश्रेणिभीषण । वरगुणस्तोमभूषण ।
जनिभयस्थानतारण । जगदवस्थानकारण ।
निखिलदुष्कर्मकर्शन । निगमसद्धर्मदर्शन ।
जय जय श्रीसुदर्शन । जय जय श्रीसुदर्शन ॥ १ ॥

भारद्वाजराजगोपालार्यकृतसंस्कृतव्याख्या

पर्यायभाष्यकारं प्रणतार्तिहरं प्रसन्नवदनाब्जम् ।
शान्तं सद्गुणवार्द्धिं श्रयामि वेदान्तलक्ष्मणार्यमुनिम् ॥

एकोऽयं द्विस्वभावस्त्रिणयनललितस्सच्चतुर्वर्गदाता
नित्योद्यत्पञ्चकृत्यष्षडरमधिवसन् सप्तहेत्यायुधोग्रः ।
अष्टप्रोद्दामबाहुर्नवमिहरनिभः कृष्णहेत्यग्रणीर्नः
प्रत्यालीढेन तिष्ठन् दशशतगुणितां संपदं सौतु नित्यम् ॥

वृषगिरिपतेर्घण्टारूपः कवीन्द्रशिखामणि-
र्निगमयुगलीचूडाचार्यो निरङ्कुशधीगुणः ।
तरुणकरुणावार्द्धिः श्रीमान् व्यरीरचदाशु यं
महितजनताभव्याकाङ्क्षी सुदर्शनसंस्तवम् ॥

बहुमतगुणो भावोदग्रः प्रसन्नपदोज्ज्वलः
प्रशमितभवप्रौढज्वालः प्रसादितभावुकः ।
कविरिव महानस्यायं श्रीसुदर्शनसंस्तवो
मिततममतेरप्यद्धा मे प्रसीदतु सर्वदा ॥

क्व वाचां गाम्भीर्यं कविकथककण्ठीरवगुरोः
क्व वाऽहं क्षोदीयान् कुमतिरवगम्यार्थविधुरः ।

क्षमन्तां सन्तस्तत् क्षमिण इह मे साहसमिदं
तदीयं सौभाग्यं मुखरयति यन्मां रसवशात् ॥

वेदान्तलक्ष्मणमुनिं प्रणम्य गुरुतल्लजम् ।
अष्टकं हेतिराजस्य व्याकरोमि यथामति ॥

अथ तत्र भवान्—

श्रीमान् वेङ्कटनाथार्यः काञ्चीमधिवसन् पुरीम् ।
द्विरदाचलसंरूढवरदागमशालिनीम् ॥

कदाचित् गृध्रसरसी तीरे निवसतां सताम् ।
शीतज्वरनिरासाय रणपुङ्गवसंनिधौ ॥

स्मृत्यैव स्वानुरक्तानां दृष्टादृष्टार्थसाधकम् ॥
स्वभक्तप्रत्यनीकानां मारणं सुरपूजितम् ॥

इत्युदीरितभूमानं सुदर्शनसुरद्रुमम् ।
तुष्टूषत्यष्टकाग्र्येण धीमान् प्रतिभटेति हि ॥

प्रतीति । **प्रतिभटानाम्**—प्रतिकूलानाम्, **श्रेणिः** राजिः तस्याः **भीषण**—भयङ्कर । **वराणाम्**—श्रेष्ठानाम्, **गुणानाम्**—ज्ञानादीनाम्, **स्तोमः**—समूह एव **भूषणम्**—आभरणम् यस्य सः तत्र संबुद्धिः । **जनिः**—उत्पत्तिरेव, **भयस्थानम्**—भीत्यास्पदम्, तस्मात्, **तारण** उत्तारण, अखिलसांसारिकभयनिवारणेत्यर्थः । **जगतः**—त्रिविधचेतनाचेतनात्मकप्रपञ्चस्य, **अवस्थानकारण**—स्थितिनिदान सकलजगत्पालकेत्यर्थः ।

'यस्मिन् विन्यस्य भारं विजयिनि जगतां जङ्गमस्थावराणां
लक्ष्मीनारायणाख्यं मिथुनमनुभवत्यत्युदारान् विहारान् ।'

(स.श. श्लो. १००)

इत्यभियुक्तोक्तेः । **निखिलानां दुष्कर्मणाम्**-दुरितानाम्, यद्वा दुष्कर्मकारिणाम्, अथवा **निखिलानाम्**-समस्तपुरुषाणाम्, **दुष्कर्मणाम्**-दुरितानाम्, **कर्शन**-हिंसन । **निगमस्य**-वेदस्य, संबन्धिनः, **सद्धर्मस्य**-श्रेष्ठधर्मस्य, **दर्शन**-प्रदर्शक । **श्रीसुदर्शन**-एवंभूत हे सुदर्शन, त्वं **जय जय**-सर्वोत्कर्षेण वर्तस्वेत्यर्थः । वाक्याभ्यासः आदरातिशयं द्योतयति ।

अत्र प्रथमतः यवसापचयन्यायेन शत्रुवर्गनिराकरिष्णुत्वं तदुपयोगिज्ञानबलैश्वर्यादिनिखिलकल्याणगुणाकरत्वं संसारसागरोत्तारकत्वं सकलजगद्रक्षकत्वं दुष्कर्मनाशनपूर्वकसद्धर्मप्रवर्तकत्वं च क्रमेणाभिहितम् । अनुप्रासः शब्दालङ्कारः, **'वर्णसाम्यमनुप्रास'** इति लक्षणात् । आशीरर्थालङ्कारः **'आशीर्नामाभिलषिते वस्तुनि आशंसनम्'** इति लक्षणात् ।

इदं च भोगावलीनामकं क्षुद्रकाव्यमिति वक्तुं शक्यते, अष्टवाक्यघटितस्कन्धवत्त्वादिति **केचित्** । **अन्ये** तु भोगावलीलक्षणपौष्कल्याभावात् नियतगणविशेषविशिष्टपद्यबन्धरूपत्वाच्च न भोगावलीः अपि तु मुक्तकाभिधं पद्यबद्धं खण्डकाव्यमेव । वृत्तं चेदं चतुश्चत्वारिंशदधिकशतोपस्कृतद्विषष्ठिसहस्रोत्तरद्विलक्षसंख्याक (२६२१४४) वृत्तपरिमिते धृत्यां छन्दसि सप्तदशसहस्राधिकद्विलक्ष (२१७०००) तमं वृत्तम् । द्विरभ्यस्तनगणतगणभगणात्मकमिति प्राहुः ॥ १ ॥

शुभजगद्रूपमण्डन । सुरजनत्रासखण्डन ।
शतमखब्रह्मवन्दित । शतपथब्रह्मनन्दित ।
प्रथितविद्वत्सपक्षित । भजदहिर्बुध्न्यलक्षित ।
जय जय श्रीसुदर्शन । जय जय श्रीसुदर्शन ॥ २ ॥

एवं तस्याखिलकल्याणगुणाकरत्वमुक्त्वा श्रुति-पाञ्चरात्रादिप्रतिपाद्यत्वमाह—**शुभेति** । **शुभस्य**-शुभकरस्य, **जगद्रूपस्य**-जगदाकारस्य, निखिलचराचरशरीरकस्य नारायणस्येत्यर्थः, **मण्डन**-अलङ्करणभूत । **सुरजनानाम्** देवजनानाम् **त्रासस्य**-भयस्य, **खण्डन**-विभञ्जन । **शतमखः**-इन्द्रः, **ब्रह्मा**-चतुर्मुखः, ताभ्यां वन्दित नमस्कृत । **शतपथब्रह्म**-शतपथब्राह्मणमथर्ववेदीयम्, यद्वा शतपथब्रह्म-शतशाखवेदः ऋग्वेद इत्यर्थः, तेन **नन्दित**-बहुमानित, तत्प्रतिपाद्येत्यर्थः । तथा च **श्रुतिः** 'पवित्रं

ते विततं' इति **'चमूषच्छ्येन'** इति **'पवित्रमित्यग्निः अग्निर्वै सहस्रार'** इत्यादि। **प्रथितैः**-प्रसिद्धैः विद्वद्भिः-विशेषविद्भिः, **सपक्षित**-अनुकूलीकृत। **भजता**-उपासीनेन, **अहिर्बुध्न्येन—**तन्नामकभक्तवरेण, रुद्रेणेत्यर्थः। **लक्षित**-अध्यक्षित, साक्षात्कृतेत्यर्थः। जयेत्यादि पूर्ववत् ॥ २ ॥

निजपदप्रीतसद्गण। निरुपधिस्फीतषड्गुण।
निगमनिर्व्यूढवैभव। निजपरव्यूहवैभव।

हरिहयद्वेषिदारण। हरपुरप्लोषकारण।
जय जय श्रीसुदर्शन। जय जय श्रीसुदर्शन ॥ ३ ॥

अथ तस्याश्रिततत्वविरोधिनिरोधकत्वादिवैभवं वर्णयति-**निजपदेति**। **निजपदे**-स्वकीयचरणारविन्दे, **प्रीताः**-प्रीतिमन्तः, **सद्गणाः**-साधुसमूहाः यस्य संबुद्धिः। **निरुपधयः** निर्व्याजाः, स्वाभाविका इत्यर्थः, **स्फीताः**-परिपूर्णाः, **षड्गुणाः**—ज्ञानबलैश्वर्यवीर्यशक्तितेजोरूपाः यस्य तस्य संबुद्धिः,

'तवानन्तगुणस्यापि षडेव प्रथमे गुणाः'

इत्युक्तेः। यद्यप्यत्र श्रूयमाणं पूर्णषाड्गुण्याश्रयत्वं परस्य ब्रह्मणः वासुदेवस्यैव, तथापि सुदर्शनस्य तेजोऽभिमानिभगवद्व्यूहत्वात् संगच्छते। **'व्यूहस्तेजोऽभिमानी नरकविजयिनः'** (सु. श. श्लो ८०) इत्यभियुक्तोक्तेः। एवमुत्तरत्रापि बोध्यम्। **निगमैः**-वेदैः, **निर्व्यूढम्**-स्थापितम्, **वैभवम्**-प्रभावः यस्य तस्य संबुद्धिः। **निजपरम्**-स्वायत्तम्, सांपराये शत्रुनिरसनेन तस्य जयापादनद्वारेति भावः। **व्यूहस्य**-वासुदेवादिव्यूहावतारस्य नारायणस्य **वैभवं** परमं तस्य संबुद्धिः। यद्वा **निजम्**-नित्यम् 'निज आत्मीयनित्ययोः' इति विश्वः। **परव्यूहयोः**-आत्मीयपरव्यूहरूपयोः **वैभवं** यस्येति, सुदर्शनस्यापि परव्यूहभेदभिन्नत्वं भगवच्छास्त्रसिद्धम्। **हरिहयस्य**-इन्द्रस्य, **द्वेषिदारुण**-शत्रुखण्डन। **हरपुरस्य**-वाराणस्याः **प्लोषस्य**-दाहस्य, **कारण**-हेतुभूत। अत्र हि पौराणी वाणी वर्तते-"पुरा हि भूमेर्भारनिरासाय यदुवंशेऽवतीर्णो भगवान् श्रीकृष्णः 'साक्षाद्वासुदेवोऽहम्' इति कल्पिततदीयशङ्खचक्रश्रीवत्सादिचिह्नं स्वाधिक्षेपकं पौण्ड्रकं हत्वा तत्सहायार्थमागतस्य काशीपतेः शिरः शाङ्र्गमुक्तैः बाणैर्निकृत्य काश्यां तत्पुर्यां न्यपातयत्।

तद्दृष्ट्वा तत्पुत्रः शङ्करमाराध्य तत्प्रसादात् प्राप्तां घोरां कृत्यां कृष्णं प्रति प्राहिणोत्। श्रीकृष्णः अक्षक्रीडासक्तोऽपि तज्ज्ञात्वा तस्यां चक्रायुधमुत्ससर्ज। भगवन्नियुक्तं तच्चक्रं कृत्यया सह सजनां साट्टप्राकारतोरणां तत्पुरीं काशीमधाक्षीत्" इति।

'निन्ये वन्येव काशी दवशिखिजटिलज्योतिषा येन दाहं
कृत्या वृत्त्या विलिल्ये शलभसुलभया यत्र चित्रप्रभावे'

(सु. श. श्लो १९)

इत्यभियुक्तोक्तिश्च।

एवंभूत श्रीसुदर्शन जय जयेति पूर्ववत् ॥ ३ ॥

स्फुटतटिज्जालपिञ्जर। पृथुतरज्वालपञ्जर।
परिगतप्रत्नविग्रह। पटुतरप्रज्ञदुर्ग्रह।

प्रहरणग्राममण्डित। परिजनत्राणपण्डित।
जय जय श्रीसुदर्शन। जय जय श्रीसुदर्शन ॥ ४ ॥

एवमस्य माहात्म्यं वर्णयित्वा योगिभिरप्यचिन्तनीयदिव्यविग्रहादिवैशिष्ट्यमाह-**स्फुटेति**। **स्फुटानाम्**-प्रकाशमानानाम्, **तटिताम्** विद्युताम्, **जालवत्**-पटलवत्, **पिञ्जर**- पिशङ्गवर्ण। **पृथुतरः**—अतिशयेन पृथुलः, **ज्वालः** शिखैव **'ज्वालकीलौ'** इत्यमरः। **पञ्जरम्**-खगबन्धनगृहम् यस्य तस्य संबुद्धिः, ज्वालमध्यवर्तिन्निति भावः। **परिगतः**—अधिगतः, **प्रत्नः**-पुरातनः, **विग्रहः**-देहः, यस्य तस्य संबुद्धिः, **'इच्छागृहीताभिमतोरुदेह'** (वि.पु ६-५-८) इत्युक्तेरिति भावः। **पटुतरप्रज्ञैः**-अतिसूक्ष्ममतिभिरपि, **दुर्ग्रह**-दुर्ज्ञेय। **प्रहरणानाम्**-चक्रादीनामायुधानाम्, **ग्रामेण**-समूहेन, **मण्डित**-अलङ्कृत। **परिजनानाम्**-आश्रितजनानाम्, **त्राणे**-रक्षणे, **पण्डित**-निपुण। हे सुदर्शन जय जयेति पूर्ववत् ॥ ४ ॥

भुवननेत्रत्रयीमय। सवनतेजस्त्रयीमय।
निरवधिस्वादुचिन्मय। निखिलशक्ते जगन्मय।

ते विततं' इति **'चमूषच्छ्येन'** इति **'पवित्रमित्यग्निः अग्निर्वै सहस्रार'** इत्यादि। **प्रथितैः**-प्रसिद्धैः विद्वद्भिः-विशेषविद्भिः, **सपक्षित**-अनुकूलीकृत। **भजता**-उपासीनेन, **अहिर्बुध्न्येन**—तन्नामकभक्तवरेण, रुद्रेणेत्यर्थः। **लक्षित**-अध्यक्षित, साक्षात्कृतेत्यर्थः। जयेत्यादि पूर्ववत् ॥ २ ॥

निजपदप्रीतसद्गण। निरुपधिस्फीतषड्गुण।
निगमनिर्व्यूढवैभव। निजपरव्यूहवैभव।

हरिहयद्वेषिदारण। हरपुरप्लोषकारण।
जय जय श्रीसुदर्शन। जय जय श्रीसुदर्शन ॥ ३ ॥

अथ तस्याश्रितत्वविरोधिनिरोधकत्वादिवैभवं वर्णयति-**निजपदेति**। **निजपदे**-स्वकीयचरणारविन्दे, **प्रीताः**-प्रीतिमन्तः, **सद्गणाः**-साधुसमूहाः यस्य संबुद्धिः। **निरुपधयः** निर्व्याजाः, स्वाभाविका इत्यर्थः, **स्फीताः**-परिपूर्णाः, **षड्गुणाः**—ज्ञानबलैश्वर्यवीर्यशक्तितेजोरूपाः यस्य तस्य संबुद्धिः,

'तवानन्तगुणस्यापि षडेव प्रथमे गुणाः'

इत्युक्तेः। यद्यप्यत्र श्रूयमाणं पूर्णषाड्गुण्याश्रयत्वं परस्य ब्रह्मणः वासुदेवस्यैव, तथापि सुदर्शनस्य तेजोऽभिमानिभगवद्व्यूहत्वात् संगच्छते। **'व्यूहस्तेजोऽभिमानी नरकविजयिनः'** (सु. श. श्लो ८०) इत्यभियुक्तोक्तेः। एवमुत्तरत्रापि बोध्यम्। **निगमैः**-वेदैः, **निर्व्यूढम्**-स्थापितम्, **वैभवम्**-प्रभावः यस्य तस्य संबुद्धिः। **निजपरम्**-स्वायत्तम्, सांपराये शत्रुनिरसनेन तस्य जयापादनद्वारेति भावः। **व्यूहस्य**-वासुदेवादिव्यूहावतारस्य नारायणस्य **वैभवं** परमं तस्य संबुद्धिः। यद्वा **निजम्**-नित्यम् 'निज आत्मीयनित्ययोः' इति विश्वः। **परव्यूहयोः**-आत्मीयपरव्यूहरूपयोः **वैभवं** यस्येति, सुदर्शनस्यापि परव्यूहभेदभिन्नत्वं भगवच्छास्त्रसिद्धम्। **हरिहयस्य**-इन्द्रस्य, **द्वेषिदारुण**-शत्रुखण्डन। **हरपुरस्य**-वाराणस्याः **प्लोषस्य**-दाहस्य, **कारण**-हेतुभूत। अत्र हि पौराणी वाणी वर्तते-"पुरा हि भूमेर्भारनिरासाय यदुवंशेऽवतीर्णो भगवान् श्रीकृष्णः 'साक्षाद्वासुदेवोऽहम्' इति कल्पिततदीयशङ्खचक्रश्रीवत्सादिचिह्नं स्वाधिक्षेपकं पौण्ड्रकं हत्वा तत्सहायार्थमागतस्य काशीपतेः शिरः शाङ्र्गमुक्तैः बाणैर्निकृत्य काश्यां तत्पुर्यां न्यपातयत्।

तद्दृष्ट्वा तत्पुत्रः शङ्करमाराध्य तत्प्रसादात् प्राप्तां घोरां कृत्यां कृष्णं प्रति प्राहिणोत्। श्रीकृष्णः अक्षक्रीडासक्तोऽपि तज्ज्ञात्वा तस्यां चक्रायुधमुत्ससर्ज। भगवन्नियुक्तं तच्चक्रं कृत्यया सह सजनां साट्टप्राकारतोरणां तत्पुरीं काशीमधाक्षीत्" इति।

'निन्ये वन्येव काशी दवशिखिजटिलज्योतिषा येन दाहं
कृत्या वृत्त्या विलिल्ये शलभसुलभया यत्र चित्रप्रभावे'

(सु. श. श्लो १९)

इत्यभियुक्तोक्तिश्च।

एवंभूत श्रीसुदर्शन जय जयेति पूर्ववत् ॥ ३ ॥

स्फुटतटिज्जालपिञ्जर। पृथुतरज्वालपञ्जर।
परिगतप्रत्नविग्रह। पटुतरप्रज्ञदुर्ग्रह।

प्रहरणग्राममण्डित। परिजनत्राणपण्डित।
जय जय श्रीसुदर्शन। जय जय श्रीसुदर्शन ॥ ४ ॥

एवमस्य माहात्म्यं वर्णयित्वा योगिभिरप्यचिन्तनीयदिव्यविग्रहादिवैशिष्ट्यमाह-**स्फुटेति**। **स्फुटानाम्**-प्रकाशमानानाम्, **तटिताम्** विद्युताम्, **जालवत्**-पटलवत्, **पिञ्जर**- पिशङ्गवर्ण। **पृथुतरः**—अतिशयेन पृथुलः, **ज्वालः** शिखैव **'ज्वालकीलौ'** इत्यमरः। **पञ्जरम्**-खगबन्धनगृहम् यस्य तस्य संबुद्धिः, ज्वालमध्यवर्तिन्निति भावः। **परिगतः**—अधिगतः, **प्रत्नः**-पुरातनः, **विग्रहः**-देहः, यस्य तस्य संबुद्धिः, **'इच्छागृहीताभिमतोरुदेह' (वि.पु ६-५-८)** इत्युक्तेरिति भावः। **पटुतरप्रज्ञैः**-अतिसूक्ष्ममतिभिरपि, **दुर्ग्रह**-दुर्ज्ञेय। **प्रहरणानाम्**-चक्रादीनामायुधानाम्, **ग्रामेण**-समूहेन, **मण्डित**-अलङ्कृत। **परिजनानाम्**-आश्रितजनानाम्, **त्राणे**-रक्षणे, **पण्डित**-निपुण। हे सुदर्शन जय जयेति पूर्ववत् ॥ ४ ॥

भुवननेत्रत्रयीमय। सवनतेजस्त्रयीमय।
निरवधिस्वादुचिन्मय। निखिलशक्ते जगन्मय।

अमितविश्वक्रियामय । शमितविष्वग्भयामय ।
जय जय श्रीसुदर्शन । जय जय श्रीसुदर्शन ॥ ५ ॥

अथ तस्य सर्वात्मकत्वमाह-**भुवनेति** । **भुवनानाम्**—लोकानाम्, **नेत्र**-चक्षुर्भूतः '**चक्षुर्देवानामुत मर्त्यानाम्**' इति श्रुतेः, '**एकं लोकस्य चक्षुः**' (सु.श.श्लो १०) इत्यभियुक्तोक्तेश्च । **त्रयीमय**-ऋग्यजुस्सामरूपतत्प्रतिपाद्यत्वादिति भावः । **सव**-**नेषु**-यागेषु, या **तेजस्त्रयी**-गार्हपत्याहवनीयदक्षिणाग्निरूपतेजस्त्रितयम्, तन्मय स्वार्थे मयट् । निरवधिकपवित्रतेजोनिधित्वादिति भावः । **निरवधिः**—निस्सीमा, **स्वादुः**—भोग्या च, या **चित्**-ज्ञानम्, **तन्मय**-तद्रूप,

'ज्ञानमेव परं रूपं ब्रह्मणः परमात्मनः ।
तदा तु चक्रमित्याहुः ब्रह्मयाथात्म्यवेदिनः ॥'

इत्यहिर्बुध्न्यसंहितायाम् । **निखिलेषु**-समस्तेषु **व्यापारेषु**, **शक्तिः**-सामर्थ्यम् यस्य तस्य संबुद्धिः, यद्वा **निखिलाः**-समस्ताः, **शक्तयः** श्रीवाणीवाङ्मृडानीरूपाः यस्य, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धात्मकव्यूहभूतस्य सुदर्शनस्य श्रीवाण्यादिशक्त्युपाधित्वादिति भावः । **अमिताः**-असंख्याताः, **विश्वस्य**-प्रपञ्चस्य याः **क्रियाः** नित्यनैमित्तकादिरूपाः, **तन्मय** सर्वकर्मसमाराध्यत्वादिति भावः । **शमितः**-नाशितः, **विष्वग्भयः**-संसारः, स एव **आमयः**-रोगः यस्य तस्य सबुद्धिः, यद्वा **शमितानि विष्वञ्चि**-सर्वतो मुखानि **भयानि आमयाश्च** यस्येति । हे सुदर्शन जयेत्यादि पूर्ववत् ॥ ५ ॥

महितसंपत्क्षतक्षर । विहितसंपत्षडक्षर ।
षडरचक्रप्रतिष्ठित । सकलतत्त्वप्रतिष्ठित ।

विविधसङ्कल्पकल्पक । विबुधसङ्कल्पकल्पक ।
जय जय श्रीसुदर्शन । जय जय श्रीसुदर्शन ॥ ६ ॥

अथ तस्य सर्वफलप्रदत्वमाह-**महितेति** । **महितसंपदा**-महनीयैश्वर्येण, **क्षतक्षर**-नाशितनश्वरैश्वर्य, स्वाश्रितानामनश्वरमोक्षैश्वर्यप्रदानेन निरस्तनश्वरभोग्येत्यर्थः । **महितसंपत्सदक्षर** इति पाठे **महितसंपदाम्**-प्रशस्तज्ञानसंपदाम्, सताम्

ब्रह्मविदाम्, **अक्षर**-मोक्षप्रदेत्यर्थः । 'अक्षरं तु मोक्षेऽपि' इत्यमरः । **महितसंवित्सद**-क्षर इति पाठेऽप्ययमेवार्थः स्पष्टः । **विहिता**-संपादिता, **संपत्**-ऐश्वर्यं येन सः विहितसंपत्, षडवयवः अक्षरः षडक्षरः, शाकपार्थिवादित्वान्मध्यमपदलोपीकर्मधारयः, '**त्रिलोकरक्षी महिमा हि वज्रिणः**' इति प्रयोगदर्शनात्, **विहितसंपत्षडक्षरः** यस्य तस्य संबुद्धिः यद्वा षट् अक्षराणि यस्य सः षडक्षरमन्त्रः **विहितसंपत्षडक्षरः** यस्य तथाभूत इति । **षडरम्**-षट्कोणम् यत् **चक्रम्**-यन्त्रम्, तस्मिन् **प्रतिष्ठित** स्थित । **सकलेषु तत्त्वेषु**-भावेषु, **प्रतिष्ठित**-अन्तर्यामित्वेनावस्थित 'यः पृथिव्यां तिष्ठन्' इत्यादिश्रुतेः षडरचक्रगतस्यापि सकलतत्त्वप्रतिष्ठितत्वं विरुद्ध्यत इति विरोधाभासः व्यञ्जकाप्रयोगात् गम्यः । **विविधानाम्**-नानाविधानाम्, **सङ्कल्पानाम्**-मनीषितानाम्, **कल्पक**-कल्पवृक्ष, सुरद्रुमवत् काङ्क्षितार्थप्रदेत्यर्थः । **विबुधानाम्**-सुराणाम्, **सङ्कल्पस्य**-इच्छाविशेषस्य, **कल्पक**-उत्पादक, हे श्रीसुदर्शन जय इत्यादि पूर्ववत् ॥ ६ ॥

प्रतिमुखालीढबन्धुर । पृथुमहाहेतिदन्तुर ।
विकटमालापरिष्कृत । विविधमायाबहिष्कृत ।

स्थिरमहायन्त्रयन्त्रित । दृढदयायन्त्रयन्त्रित ।
जय जय श्रीसुदर्शन । जय जय श्रीसुदर्शन ॥ ७ ॥

अथ तस्य निरतिशयकरुणाकरत्वमाह-**प्रतिमुखेति** । **प्रतिमुखालीढेन**-पुरतः-न्यस्तैकपादात्मकेन स्थितिविशेषेण, **'आलीढन्तु ततोऽग्रतः ।**

'दक्षिणे वाममाकुञ्च्य प्रत्यालीढं विपर्यय ॥' इत्युक्तत्वात् । **बन्धुर**-ईषन्नम्र, किंचिन्नम्रेत्यर्थः ।यद्वा बन्धुररम्य, '**बन्धूरबन्धुरौ रम्ये नम्रे हंसे च बन्धुरः**' इति रभसः । '**आलीढविशेषशोभिने**'ति रघुवंशोक्तेः । **पृथुभिः**-महद्भिः, **हेतिभिः**-आयुधैः, **दन्तुर**-व्याप्त । **विकटया**—विशालया, **मालया**-स्रजा, **परिष्कृत**-अलंकृत । **विविधाभिः मालाभिः** अज्ञानान्यथाज्ञानविपरीतज्ञानादिभिः, 'माया स्याच्छाम्बरीबुद्ध्यो' रिति **मेदिनी** । **बहिष्कृत**-तच्छून्येत्यर्थः, अथवा बहिष्कृतविविधासुरादिमायेत्यर्थः । आहिताग्न्यादित्वात् परनिपातः । **स्थिरे महायन्त्रे**-स्वीयम-

हायन्त्रे, **यन्त्रित**-प्रतिष्ठित । **दृढा**-अविचाल्या, **दया**-कृपैव, **यन्त्रम्** तेन, **यन्त्रित**-वशीकृत । हे सुदर्शन जय जयेत्यादि पूर्ववत् ॥ ७ ॥

दनुजविस्तारकर्तन । दनुजविद्याविकर्तन ।
जनितमिस्राविकर्तन । जगदविद्यानिकर्तन ।

अमरदृष्टस्वविक्रम । समरजुष्टभ्रमिक्रम ।
जय जय श्रीसुदर्शन । जय जय श्रीसुदर्शन ॥ ८ ॥

तस्य सांसारिकसकलदुःखनिवर्तकत्वमाह—**दनुजेति** । **दनुजानाम्**-दानवानाम्, **विस्तारस्य**-प्राचुर्यस्य, **कर्तन**-छेदन । अत्र हेतुमाह-**दनुजविद्येति** । **दनुजविद्यायाः** मायायाः, **विकर्तन**-विशेषेण छेदक । **जनिः**-उत्पत्तिः, संसार इति भावः । सैव **तमिस्रा**-तामसी रात्रिः, तस्याः **विकर्तन**-दिवाकर, संसारनाशकेत्यर्थः । तत्र हेतुमाह-**जगदिति** । जगताम् अविद्यायाः-अज्ञानस्य **निकर्तन**-निश्शेषनाशक । **अमरैः**-देवैः, **दृष्टः स्वविक्रमः**-स्वपराक्रमः यस्य तस्य संबुद्धिः । **समरेषु**-युद्धेषु, **जुष्टः**-आश्रित, **भ्रमिक्रमः**-भ्रमणभङ्गी, येन तस्य संबुद्धिः । हे सुदर्शन जय जयेति पूर्ववदर्थः ॥ ८ ॥

द्विचतुष्कमिदं प्रभूतसारं पठतां वेङ्कटनायकप्रणीतम् ।
विषमेऽपि मनोरथः प्रधावन् न विहन्येत रथाङ्गधुर्यगुप्तः ॥ ९ ॥

अथ एवं श्रीसुदर्शनमभिष्टूय-

'अन्तेऽनुष्टुभमार्यां वा कविकृत्याख्ययाऽन्विताम् ।
कुर्याच्चाटुप्रबन्धानामेष साधारणो विधिः ॥'

इति वचनात् स्वकीर्त्यनुवृत्तये स्वनामग्रन्थनिवेशपूर्वकं एतदध्येतृणां फलमुपदिशति-**द्विचतुष्कमिति** । **वेङ्कटनायकेन**-श्रीवेङ्कटेशेन, **प्रणीतम्**-साधुपरित्राणार्थम् विरचितम् **प्रभूतम्**-पुष्कलम्, **सारः**-स्वाद्यतातिशयः यस्य तत्, **इदम्** सुदर्शनविषयकम्, **द्विचतुष्कम्**-अष्टकम्, श्रीसुदर्शनाष्टकमित्यार्थः । **पठताम्**-अध्येतृणाम्, **विषमेऽपि**-अप्राप्यविषयेऽपि, **प्रधावन्**-गच्छन्, **मनोरथः**-सङ्कल्पः स एव रथः **रथाङ्गधुर्येण**-श्रीसुदर्शनेन, सुदृढचक्रेण च, **गुप्तः**-रक्षितस्सन्, **न विहन्येत**-न निरुध्येत, न भज्येत च । श्रीसुदर्शनप्रसादात् समस्ताभिलषितसिद्धिर्भवतीत्यर्थः । वस-

न्ततिलकावृत्तम्-**'विषमे ससजागुरू समे चेत् सभरायश्च वसन्तमालिका स्यात् ।'** इति लक्षणम् । तथा चानुष्टुबार्यावृत्तयोरुपलक्षणपरत्वमित्यर्थः ।

रचिताऽपि विचेयबुद्धिना मयकैषायुधराजसंस्तुतिः ।
विवृतिर्विबुधानुरञ्जिनी भवतात् पञ्जरकीरवागिव ॥

वेदान्तलक्ष्मणमुनिर्वेदान्तविशदाशयः ।
अङ्गीकरोतु दासोक्तिमर्भकोक्तिमिवाविलाम् ॥

इति श्रीमद्वेदान्तरामानुजसंयमिसार्वभौम-
करुणाकटाक्षलवोल्लसितसत्ताकेन
तेन्परै श्रीराजगोपालाचार्येण
विरचितं सुदर्शनाष्टक-
व्याख्यानं संपूर्णम् ।

श्रीमते लक्ष्मीहयवदनपरब्रह्मणे नमः ।

निगमान्तमहादेशिकविरचितं षोडशायुधस्तोत्रम् ।

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥
भारद्वाजराजगोपालार्यविरचितसंस्कृतव्याख्या
हृदयगुहामधितिष्ठन् महतो मोहान् मतङ्गजान् भिन्दन् ।
अव्यादस्मान् नित्यं तेजस्वी कश्चिदद्भुतः सिंहः ॥
श्रीमद्गृध्रसरस्तटावनिजुषां श्रीवैष्णवानां पुरा
यः शीतज्वरनुत्तये व्यतनुत श्रीहेतिराजाष्टकम् ।
तस्यैवायुधसंस्तुतिं च महितां माहात्म्यवार्द्धिस्स नः
श्रीमान् वेदवतंसदेशिकमणिः पायादपायादसौ ॥
आचार्यानमितगुणानानम्यैतैः प्रदर्शितानर्थान् ।
विलिखाम्यत्र यथामति सन्तस्संवीक्ष्य मोदध्वम् ॥

अथ तत्रभवान् अतिविकटविविधकलिकलुषविघटनपटुतरवेङ्कटगिरिवर-विहरणकृतक्षणरमारमणदिव्यघण्टावतारप्रकटितनिरवधिकनिजमहिममहनीयः निखिलकविकथककलभकण्ठीरवः श्रीरङ्गरमणदिव्याज्ञालब्धवेदान्ताचार्यपद-तत्सहधर्मचारिणीसंप्रसादितसर्वतन्त्रस्वतन्त्रताबिरुदाञ्चितः अयमस्मत्परमगुरुः श्रीमान् वेङ्कटेशसुगृहीतनामा कविशिखामणिः **'अभिप्रियाणि काव्या विश्वाचक्षाणो अर्षति'** इति श्रुत्या

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥'

इत्यालङ्कारिकवचनप्रामाण्याच्च काव्यस्यानेकश्रेयस्साधनतां **'काव्यालापांश्च वर्जयेत्'** इति निषेधस्यासत्काव्यविषयतां च पश्यन् **'परश्शतं वाऽपि परस्सहस्रं श्रीवेङ्कटाचार्यकृताः प्रबन्धाः । तत्रालमेकः खलु भुक्तिमुक्त्योः कार्त्स्न्येन कस्तान् गणयेत् समस्तान् ।'** इत्युक्तरीत्या परावरतत्त्वप्रतिपादकैः भोगमोक्षप्रदैः

परश्शतप्रबन्धैर्लोकाननुगृह्णन्, काञ्चीमधिवसन् कदाचित् श्रीगृध्रसरस्तीरवासिनां साधूनां सुदुस्सहस्य शीतज्वरस्य निवृत्तये श्रीसुदर्शनाष्टकाभिधं प्रबन्धं विरचय्य, पुनरपि तस्यैवायुधविषयकं षोडशायुधस्तोत्राभिधं प्रबन्धं प्रणेष्यन्, प्रथमतः तादृशायुधवरनिकरसंसेवितस्य हेतिराजस्य श्रीसुदर्शनस्यानुग्रहं प्रार्थयते-**स्वसङ्कल्पे**ति ।

स्वसङ्कल्पकलाकल्पैरायुधैरायुधेश्वरः ।
जुष्टः षोडशभिर्दिव्यैः जुषतां नः परः पुमान् ॥ १ ॥

स्वसङ्कल्पस्य-स्वकीयेच्छाविशेषस्य, **कला**-षोडशोभागः-'कला तु षोडशो भाग' इत्यमरः । तस्याः ईषन्न्यूनैः **कलाकल्पैः** 'ईषदसमाप्तौ कल्पप्देश्यदेशीयर' इति कल्पप्प्रत्ययः, स्वसङ्कल्पकलासदृशैरित्यर्थः । तथा चोक्तम् आचार्यदण्डिना—

'कल्पदेशीयदेश्यादिप्रख्यप्रतिनिधी अपि ।
तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ॥
उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः ॥'

इति । तथा च षोडशधा विभिन्नैः स्वसंकल्पैरिव स्थितैरिति भावः । **दिव्यैः**-लोकोत्कृष्टैः, **षोडशभिरायुधैः**-चक्रादिभिः प्रहरणैः, तथा चोक्तम्-

'चक्रं कुन्तं कृपाणं परशुहुतवहावङ्कुशं दण्डशक्ती
शङ्खं कोदण्डपाशौ हलमुसलगदावज्रशूलाख्यहेतीन् ।
दोर्भिस्सव्यापसव्यैर्दधदतुलबलस्स्तम्भितारातिदर्पैः
व्यूहस्तेजोऽभिमानी नरकविजयिनो जृम्भतां संपदे वः ॥'

(सु.श.श्लो. ८०)

इति । **जुष्टः**-सेवितः, **आयुधेश्वरः**-हेतिराजः, तद्रूपी, **परः पुमान्**-परमपुरुषः श्रीमन्नारायण इत्यर्थः । **नः**-अनन्यगतीनस्मान्, **जुषताम्**-प्रीणातु, 'जुष प्रीणने' इति धातोर्लोट्, प्रीतिविषयीकुरुतामित्यर्थः । अनिष्टनिवारणैरिष्टप्रापणैश्च अस्मान् अनुगृह्णात्विति भावः ।

अत्र **स्वसङ्कल्पकलाकल्पैः** इत्यत्र तद्धितगा आर्थी लुप्तोपमा। अत्रैव ककारलकारादीनामसकृदावर्तनात् वृत्त्यनुप्रासः शब्दालङ्कारः। **'एकस्याप्यसकृत्परः'** इति लक्षणात्। अनयोरुभयोरपि नीरक्षीरन्यायेन एकवाचकानुप्रवेशलक्षणसङ्करः।

'स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम्।

व्यवस्थितं च' इति लक्षणात्। **रायुधैरायुधे**त्यत्र छेकानुप्रासः। **'सोऽनेकस्य सकृत् पूर्व'** इति लक्षणात्। पक्षे वृत्त्यनुप्रासः। त्रयाणां तिलतण्डुलन्यायेन एकत्र मेलनात् संसृष्टिः। **'सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः'** इति तल्लक्षणम्। अत्र प्रथमं जलदेवताकस्य यगणस्योपादानात् अभ्युदयावहत्वमस्य ग्रन्थस्य। तदुक्तम्-**'योऽभ्युदयं पयः प्रथमल'** इति। वृत्तम् अनुष्टुभं पथ्यावक्त्रम्। तथा चोक्तम् **केदारेण** 'युजोर्ज्येन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम्' इति ॥ १ ॥

अथ तस्यायुधप्रधानात् चक्रादभ्युदयमाशास्ते-**यदायत्तमिति**।

यदायत्तं जगच्चक्रं कालचक्रं च शाश्वतम्।
पातु नस्तत् परं चक्रं चक्ररूपस्य चक्रिणः ॥ २ ॥

जगच्चक्रम्-चतुर्विंशतितत्त्वात्मकप्रपञ्चजातम्, **शाश्वतम्**-नित्यम्, **कालचक्रं च**-कालात्मकं चक्रं च, यदायत्तम्-**यदधीनम्**, तथा चोक्तम् अहिर्बुध्न्यसंहितायाम्

'त्रिणाभियुक्तं षण्णेमि पञ्चारं चक्रमव्ययम्।
संवत्सरमयं यत्तत् कालचक्रमिति स्मृतम् ॥

तद्वशे वर्तते नित्यं चेतनाचेतनात्मकम्।
परिवर्तयते देवः तदेतत् चक्ररूपधृत् ॥'

इति।

'अव्यक्तादिविशेषान्तैः स्वरूपैरपरैर्वृतम्।
चतुर्विंशतिसंख्यातैः पुरुषात्मकनेमि यत् ॥

जगच्चक्रमिति ख्यातं तच्च प्रेरयते स्वयम् ॥'

इति च। भवतीत्यध्याहारः। **'अस्ति भवन्ती परोऽप्रयुज्यमानोऽप्यस्ति'** इति न्यायात्। **तत्**—तादृशम्, **परम्**-सर्वोत्कृष्टम्, **चक्ररूपस्य**-सुदर्शनात्मकस्य, **चक्रिणः**-भगवतश्चक्रपाणेर्नारायणस्य, **चक्रम्**-चक्रायुधम्, **नः अव्यात्**-अस्मान् पातु रक्षतु। रक्षणं चानिष्टनिवृत्तिपूर्वकमिष्टप्रापणम्। शत्रुनिरसनेन इन्द्रादिलोकानां पर्यवस्थापनात्। अत एव कृतादिकालप्रवर्तकत्वाच्च तयोर्जगच्चक्रकालचक्रयोर्नियामकं तच्चक्रं तादृशजगदन्तर्भूतं कालकाल्यं च मामभिरक्षत्विति भावः। अत्र चक्रशब्दस्यासकृत् आवर्तनात् वृत्त्यनुप्रासः शब्दालंकारः। स्थाननियमाभावात् न यमकम्। आशीरर्थालंकारः। **'आशीर्नामाभिलषिते वस्तुन्याशंसनं यथे'**ति लक्षणात् ॥ २ ॥

अथ तस्य परशुं वर्णयति-**यत्प्रसूतीति**।

यत्प्रसूतिशतैरासन् रुद्राः परशुलाञ्छनाः।
स दिव्यो हेतिराजस्य परशुः परिपातु नः ॥ ३ ॥

रुद्राः-बहवो रुद्राः, **यत्प्रसूतिशतैः**-यदीयोत्पत्तिशतैः, अत्र शतशब्दः आनन्त्यपरः 'शतं सहस्रमयुतमित्यनेकार्थवाचकम्' इत्युक्तेः। **परशुलाञ्छनाः**—परशुचिह्निताः, **आसन्**-अभूवन्, **सः दिव्यः**, **हेतिराजस्य**-सुदर्शनस्य, **परशुः**-परशुनामकमायुधम्, अस्मान्, **परिपातु**-अव्यात् ॥ ३ ॥

अथ तस्य कुन्तमभिवर्णयति-**हेलयेति**।

हेलया हेतिराजेन यस्मिन् दैत्याः समुद्धृते।
शकुन्ता इव धावन्ति स कुन्तः पालयेत नः ॥ ४ ॥

हेतिराजेन-सुदर्शनेन, **यस्मिन्**-कुन्ते, **हेलया**-लीलयाऽपि, न तु युयुत्सयेति भावः। **समुद्धृते**-हस्तेनोद्धृते सति, **दैत्याः** असुराः, **शकुन्ता इव**-पक्षिण इव, **धावन्ति**-भयात् प्रद्रवन्ति, **स कुन्तः**-प्रासः, **नः पालयेत**-गोपायेत्।

अत्र लीलयाऽपि कुन्तोद्धरणे दैत्यपलायनोक्त्या युयुत्सया तदुद्धरणे तत्पलायनस्य दण्डापूपिकान्यायसिद्धत्वात् अर्थापत्तिरलंकारः। तथा च सूत्रम्—**'दण्डापूपिकयाऽर्थान्तरापतनमर्थापत्तिः'** इति। शकुन्ता इवेत्यत्र पूर्णोपमा। सा च **'इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च'** इति वार्तिकात् नित्य-

समासे इवशब्दयोगे समासगा। आशीश्चालंकारः। त्रयाणां परस्परनैरपेक्ष्यात् संसृष्टिः। लक्षणं तूक्तम् ॥ ४ ॥

अथ तदीयो दण्डः अस्मदीयशत्रुशिक्षणं कुर्यादित्याह—**दैत्येति**।

दैत्यदानवमुख्यानां दण्ड्यानां येन दण्डनम्।
हेतिदण्डेशदण्डोऽसावस्माकं दण्डयेत् द्विषः ॥ ५ ॥

येन-दण्डेन, **दैत्यदानवमुख्यानाम् दैत्याः**-दितिसुताः हिरण्यकशिपुप्रभृतयः **दानवाः**-दनुसुताः, विप्रचित्तिप्रमुखाः, तदुक्तं श्रीमहाभारते-'**एक एव दितेः पुत्रो हिरण्यकशिपुः स्मृतः**' इति '**चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत।**

तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ॥'

इति च, ते मुख्याः येषां तेषां दैत्यदानवमुख्यानाम् दैत्यदानवप्रभृतीनामित्यर्थः। **दण्ड्यानाम्**-दण्डमर्हन्तीति दण्ड्याः, शिक्षणीयानामित्यर्थः, '**दण्डोऽस्त्री दमहिंसा सेना लगुडेषु शासने राज्ञाम्**' इति नानार्थरत्नमालायाम्। **दण्डनम्**-शिक्षणम् भवति, दण्डार्हाणां दण्डेन दमनं युक्तरूपमेवेति भावः। **असौ**-सः, **हेतिदण्डेशदण्डः** हेतिरूपः **दण्डेश**स्य सुदर्शनस्य **दण्डः** लगुडः, तद्रूपमायुधम्, **अस्माकं द्विषः** शत्रून्, **दण्डयेत्**-हिंस्यात्, यद्वा **दण्ड्यानाम्**-दैत्यदानवमुख्यानाम्-दैत्यदानवप्रधानानाम् **येन दण्डनम्** पूर्ववदन्यत्। अत्र दण्डशब्दस्यासकृदावर्तनात् वृत्त्यनुप्रासशब्दालङ्कारः, आशीरर्थालंकारश्च ॥ ५ ॥

अथ तस्याङ्कुशं वर्णयति अनन्येति।

अनन्यान्वयभक्तानां रुन्धन्नाशामतङ्गजान्।
अनङ्कुशविहारो नः पातु हेतीश्वराङ्कुशः ॥ ६ ॥

अनन्यान्वयभक्तानाम् अन्यस्मिन् अन्वयः येषां ते अन्यान्वयाः ते न भवन्तीति अनन्यान्वयाः ते च भक्ताश्चेति कर्मधारयः, तेषाम् अनन्य (नान्वय) भक्तानामित्यर्थः। **आशामतङ्गजान् आशाः**-विषयेच्छा एव, **मतङ्गजाः**-मत्तहस्तिनः तान्, **रुन्धन्**-निरुन्धन्, **अनङ्कुशविहारः अनङ्कुशः** अनर्गलः **विहारः**-लीलाव्यापारः यस्य सः, क्वचिदप्यप्रतिहतप्रचार इत्यर्थः। **हेतीश्वराङ्कुशः** हेतीश्वरस्य सुदर्शनस्य

अङ्कुशः सृणिः, तद्रूपमायुधम् **नः पातु**। आशामतङ्गजानित्यत्र रूपकम्। आशीः, तयोः संसृष्टिः ॥ ६ ॥

अथ तस्यायुधभूतं हुतवहं वर्णयति—**संभूयेति**।

संभूय शलभायन्ते यत्र पापानि देहिनाम्।
स पातु शतवक्त्राग्निहेतिर्हेतीश्वरस्य नः ॥ ७ ॥

यत्र यस्मिन् शतवक्त्राग्न्यात्मकायुधे **देहिनाम्** क्षेत्रिणाम्, **पापानि संभूय** एकीभूय, **शलभायन्ते**-शलभा इवाचरन्तीति शलभायन्त इति क्यङ्प्रत्ययः। यथा शलभाः ज्वालायां पतित्वा स्वरूपनाशं नश्यन्ति, तद्वत् **देहिनां पापानि** तदग्निं प्राप्य नश्यन्तीति भावः। तथा च स्वभक्तानां पापानि सुदर्शनं स्वायुधाग्निना भस्मीकरोतीति भावः। **सः** तादृशः, **हेतीश्वरस्य**-सुदर्शनस्य, **शतवक्त्राग्निहेतिः शतवक्त्रः** शतमुखः शतज्वाल इत्यर्थः। यः **अग्निः** तद्रूपः, **हेतिम्**-आयुधम् '**वज्रं तथैव परशुं तथा शतमुखानलम्**' इति पाञ्चरात्रे। **नः पातु**। अत्र शलभायन्त इत्यत्रानुक्तधर्मवाचका क्यङ्गता लुप्तोपमा। हेतिर्हेतीत्यत्र छेकानुप्रासः। तयोस्संसृष्टिः ॥ ७ ॥

अथ तस्य ज्ञानात्मकात् निस्त्रिंशात् तत्त्वज्ञानमभीप्सते— **अविद्यामिति**।

अविद्यां स्वप्रकाशेन विद्यारूपः छिनत्ति यः।
स सुदर्शननिस्त्रिंशस्सौतु नस्तत्त्वदर्शनम् ॥ ८ ॥

विद्यारूपः ज्ञानस्वरूपः ज्ञानाधिदैवतमित्यर्थः। तदुक्तं पुराणरत्ने अस्त्रभूषणाध्याये-

'बिभर्ति यच्चासि वरमच्युतोऽत्यन्तनिर्मलम्।

विद्यामयं तु यज्ज्ञानम् ॥' इति।

यः निस्त्रिंशः स्वप्रकाशेन-स्वतेजसा, **अविद्याम्**-अज्ञानम् **छिनत्ति**-कृन्तति, **सः**-तादृशः, **सुदर्शननिस्त्रिंशः सुदर्शनस्य** हेतिराजस्य **निस्त्रिंशः**-असिवरः **नः** अस्माकम् **तत्त्वदर्शनम्** तत्त्वज्ञानम्, **सौतु**-प्रसूताम्, तथा चास्माकमविद्यां विनिवर्त्त्य तत्त्वविषयकं यथार्थज्ञानं जनयत्विति भावः। आशीरलंकारः ॥ ८ ॥

अथ तस्य शक्तेर्महिमानमाह-**क्रियेति।**

क्रियाशक्तिगुणो विष्णोर्यो भवत्यतिशक्तिमान्।
अकुण्ठशक्तिः सा शक्तिरशक्तिं वारयेत नः ॥ ९ ॥

यःशक्तिः विधेयप्राधान्यात् पुंस्त्वम्। तदुक्तमभियुक्तैः 'उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत् सर्वनामपर्यायेण तत्तल्लिङ्गभाक्' इति। **अतिशक्तिमान्**-अधिकसामर्थ्यवान्, **विष्णोः**-सर्वव्यापकस्य नारायणस्य, **क्रियाशक्तिगुण**-क्रियासु सृष्ट्यादिव्यापारेषु **शक्तिः**—अघटितघटनासामर्थ्यम् तद्रूपः **गुणः** भवति, **अकुण्ठशक्तिः**-अप्रतिहतसामर्थ्या **सा शक्तिः**- शक्त्यायुधम्, **नः**-अस्माकम् **अशक्तिम्**-असामर्थ्यम् **वारयेत**-निरुन्ध्यात्। भगवतः शक्तिरूपगुण एव श्रीसुदर्शनस्यायुधभूतशक्तिरूपतया परिणत इति भावः। अत्र शक्तिशब्दस्यासकृत्श्रवणादनुप्रासः शब्दालङ्कारः। आशीरर्थालंकारः ॥

अथ तस्य पाञ्चजन्यप्रभावं प्रथयति-**तारत्वमिति।**

तारत्वं यस्य संस्थाने शब्दे च परिदृश्यते।
प्रभोः प्रहरणेन्द्रस्य पाञ्चजन्यः स पातु नः ॥ १० ॥

यस्य-पाञ्चजन्यस्य, **संस्थाने**-आकारे, **शब्दे च** नादे च **तारत्वम्**-प्रणवत्वम् उच्चैस्स्वरत्वं च, यद्वा **शब्दे च तारत्वं** प्रणवस्वरूपत्वमेव, भगवच्छङ्खस्य सर्ववेदमयत्वेन तन्नादस्यप्रणवस्वरूपत्वात्। तदुक्तं श्रीभागवते-'**ब्रह्ममयेन कम्बुना**' इति। **परिदृश्यते**-संलक्ष्यते। **सः**-तादृशः, **प्रभोः**-लोकनाथस्य, **प्रहरणेन्द्रस्य**-हेतिराजस्य, **पाञ्चजन्यः**-शङ्खः, **नः पातुः**अस्मानवतु। अत्र वर्ण्यत्वेन प्राकरणिकयोः पाञ्चजन्यस्य नादसंस्थानयोस्तारत्वदर्शनरूपः एकधर्मान्वयः तुल्ययोगिता,

'**नियतानां सकृत् धर्मः सा पुनस्तुल्ययोगिता**' इति लक्षणात्। सा च श्लेषभित्तिका भेदाध्यवसायानुप्राणिता, अनुप्रासश्च ॥ १० ॥

अथ तदीयं धनुस्तत्त्वं दर्शयति-यमिति।

यं सात्त्विकमहङ्कारमामनन्त्यक्षसायकम्।
अव्यान्नः चक्ररूपस्य तद्धनुःशार्ङ्गधन्वनः ॥ ११ ॥

अक्षसायकम् अक्षानि इन्द्रियाण्येव सायकाः बाणाः यस्य तम्, **यम्**-धनुः विधेयप्राधान्यत्वात् पुंस्त्वम्—

'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत्।

सात्त्विकम् सत्त्वगुणप्रधानम्, **अहङ्कारम्**-अहङ्कारतत्त्वम् **आमनन्ति**—अधीयन्ते, परावरतत्त्वज्ञाः पराशरप्रभृतय इति शेषः। तथा चाह भगवान् पराशरः—

'भूतादिमिन्द्रियादिं च द्विधाऽहङ्कारमीश्वरः।
बिभर्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम् ॥' इति।

'यानीन्द्रियाण्यशेषानि बुद्धिकर्मात्मकानि वै।
शररूपाण्यशेषाणि तानि धत्ते जनार्दनः ॥'

इति च। अत्र भूतादिः तामसाहङ्कारः, इन्द्रियादिः सात्त्विकाहङ्कार इत्यर्थः। उभावपि क्रमात् शङ्खरूपेण शार्ङ्गरूपेण च स्थितावित्यर्थः। इन्द्रियाणां तैजसकार्यत्ववचनं सहकारित्वेन; तैजसस्य वैकारिकतामसयोरुभयोरपि सहकारित्वात्। तदुक्तं वायुपुराणे रजः प्रवर्तकतन्त्रे। **तत्**- तादृशम्, **चक्ररूपस्य** सुदर्शनात्मनः, **शार्ङ्गधन्वनः** शार्ङ्गपाणेर्नारायणस्य **धनुः**चापः **नः अव्यात्** अस्मान् रक्षतु ॥११ ॥

अथ तस्य पाशात् भवपाशमोचनं प्रार्थयते— **आयुधेन्द्रेणेति।**

आयुधेन्द्रेण येनैव विश्वसर्गो विमुच्यते।
स नः सौदर्शनः कुर्यात् पाशः पाशविमोचनम् ॥ १२ ॥

आयुधेन्द्रेण सुदर्शनिन कर्त्रा, **येनैव** पाशेनैव करणेन यद्वा **आयुधेन्द्रेण** आयुधवरेण **येनैव** इति सामानाधिकरण्येनान्वयः। **विश्वसर्गः** प्रपञ्चसृष्टिः, **विमुच्यते**-विमोचितो भवति. अन्तर्भावितणिजन्तात् व्युपसृष्टान् मुञ्चतेः कर्मणि लट्। यद्वा **आयुधेन्द्रेण** येन करणेन **विश्वसर्गः विमुच्यते** पुरुषैरिति शेषः। मुञ्चतेः कर्मणि लट्। **सः** तादृशः **सौदर्शनः** सुदर्शनसंबन्धी **पाशः** पाशायुधम् **नः** अस्माकम् **पाशविमोचनम्** पाशस्य संसारबन्धस्य विमोचनम् विमुक्तिम्, **कुर्यात्** करोतु। अत्र

पाशस्य बन्धहेतुभूतस्यापि बन्धविमोचकत्वमिति विरोधोऽऽप्याभासते । अत्र पाश इति छेकानुप्रासः ॥ १२ ॥

अथ तस्य सीरसंपदं संदर्शयति— **विहार** इति ।

विहारो येन देवस्य विश्वक्षेत्रकृषीवलः ।
व्यज्यतेऽनेन सीरेण नासीरविजयोऽस्तु नः ॥ १३ ॥

येन-सीरेण, **विश्वक्षेत्रकृषीवलः** विश्वम् प्रपञ्च एव क्षेत्रम् केदारः, तस्य कृषीवलः कर्षकः तदुपजीवीत्यर्थः । **विहारः** विहरणम् क्रीडेत्यर्थः । **व्यज्यते**-ज्ञायते, **अनेन** तेन **सीरेण** हलेन, **नः** अस्माकम् **नासीरविजयः** नासीरे सेनामुखे 'सेनामुखं तु नासीरम्' इति कोशः । विजयः जयः **अस्तु** । अत्र '**विश्वक्षेत्रकृषीवल** इत्यत्र परम्परितरूपकम्—

'नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत्परम्परितम्' इति लक्षणात् ।। १३ ॥

अथ तस्य वज्रवैभवं वर्णयति— **आयुधानामिति** ।

आयुधानामहं वज्रमित्यगीयत यस्स नः ।
अव्यात् हेतीशवज्रोऽयं दधीच्यस्थिसमुद्भवः ॥ १४ ॥

यः वज्रम् **आयुधानाम्** अर्वाचीनानां प्रहरणानां मध्ये, भगवदायुधसुदर्शनाद्यपेक्षया दधीच्यस्थिसमुद्भवस्यापि वज्रस्य निकृष्टत्वात् आयुधपदमर्वाचीनायुधपरमित्याचार्याः । **अहं वज्रम्** वज्रायुधमस्मीति, **अगीयत**-अगायि; विभूत्यध्याये भगवता गीताचार्येणेति शेषः । **सः** तादृशवैभवविशिष्टः **दधीच्यस्थिसमुद्भव** दधीचिः तन्नाम्नस्तपोनिधेर्भार्गवतस्य अस्थिनः कीकसात् समुद्भवः समुत्पत्तिर्यस्य । तथा च श्रुतिः-'**इन्द्रो दधीचोऽस्थिभिः । वृत्राण्यप्रतिष्कुतः** । जघान नवतीर्नव' इति । अत्रेतिहासमाचक्षते शाट्यायनिनः 'आथर्वणस्य दधीचो जीवतो दर्शनिनासुरा पराबभूवुः । अथ तस्मिन् स्वर्गते सत्यसुरैः पूर्णा पृथिव्यभवत् । अथेन्द्रस्तैरसुरैस्सह योद्धुमशक्नुवन् तदृषिमन्विच्छन् स्वर्गं गत इति शुश्राव । अथ पप्रच्छ तत्रत्यान् । नेह किमस्य किंचित् परिशिष्टमङ्गमस्तीति । तस्मा अवोचन् । अस्त्येतदाश्वं शीर्षं येन शिरसा अश्विभ्यां मधुविद्यां प्राब्रवीत् । तत्तु न विद्म

यत्राभवदिति । पुनरिन्द्रोऽब्रवीत् तदन्विच्छतेति । तद्वाऽन्वेषिषुः । तच्चर्यणावत्यनुविद्या जहुः । शर्यणावद्धवै नाम कुरुक्षेत्रस्य जघनार्धे सरस्स्यन्दते । तस्य शिरसोऽस्थिभिरिन्द्रोऽसुरान् जघान' इति । भारती भारती त्वेवं वर्तते । पुरा हि त्वाष्ट्रो विश्वरूपः असुराणां स्वस्त्रीयः सुराणां पौरोहित्यं कुर्वन् असुरप्रार्थितायाः स्वमातुर्वचनेन हिरण्यकशिपुमगमत् वसिष्ठशापान्नष्टे च हिरण्यकशिपौ मातुलपक्षश्रेयोर्थ्यसौ अत्यर्थं तपश्चकार । अथ तपो विघ्नमाचरत्सु देवेषु स मन्त्रान् जजाप । तैर्मन्त्रैरवर्धत त्रिशिराः । एकेनास्येन यज्ञेषु सोममपिबत् ।अपरेणान्नमभक्षयत् । इतरेणेन्द्रादीनकबलयत् । ततो देवा ब्रह्माणमुपगम्य तस्य वधोपायमपृच्छन् । स तु दधीचेः भार्गवस्यास्थिविनिर्मितेन वज्रेण तस्य वधोपायमादिक्षत् । देवैः प्रार्थितो दधीचिः समयपूर्वकं शरीरं तत्याज । इन्द्रः दुष्करतपोदहनदग्धकिल्विषदधीच्यस्थिविनिर्मितेन वज्रेण तं त्वाष्ट्रं विश्वरूपं जघान । अनन्तरं विश्वरूपगात्रमथनसंभवमरिं वृत्रं चेति । तादृशदधीच्यस्थिनिर्मितः । **हेतीशवज्रः** सुदर्शनवज्रायुधम् **नः अव्यात्** अस्मान् रक्षतु । उदात्तमलंकारः । 'उदात्तं वस्तुनः संपन्महता चोपलक्षणम्' इति लक्षणात् । आशीरलंकारश्च ॥ १४ ॥

अथ तस्य गदां वर्णयति— **विश्वेति** ।

विश्वसंहतिशक्तिर्या विश्रुता बुद्धिरूपिणी ।
सा नः सौदर्शिनी भूयात् भयप्रशमनी गदा ॥ १५ ॥

विश्वसंहृतिशक्तिः विश्वस्य प्रपञ्चस्य संहृतौ शक्तिः सामर्थ्यं यस्यास्सा, या-गदा, यद्वा **या विश्वसंहृतिशक्तिः** भगवतः पुरुषोत्तमस्य प्रपञ्चसंहारशक्तिरूपा **बुद्धिरूपिणी** बुद्धिः महत्तत्त्वम् तद्रूपिणी तदात्मिका च, **विश्रुता**-प्रसिद्धा गदायाः महत्तत्त्वरूपत्वं च **श्रीविष्णुपुराणे** श्रुतम्—'**बुद्धिरध्यास्ते गदारूपेण माधवे**' इति । अत्र '**बुद्धि महत्तत्त्वम्**' इति **तद्व्याख्यातारः** । मूलप्रमाणानुसारेणात्रापि महत्तत्त्वे बुद्धिशब्दप्रयोगः । **सा सौदर्शिनी** सुदर्शनसंबन्धिनी **गदा नः** अस्माकम् **भयप्रशमनी** समस्तभयप्रशान्तिकरी **भूयात्** । आशीरलंकारः ॥ १५ ॥

अथ तस्य मुसलतो मोहभङ्गं प्रार्थयति— **यातीति।**

यात्यतिक्षोदशालित्वं मुसलो येन तेन नः।
हेतीशमुसलेनाशु भिद्यतां मोहमौसलम्॥ १६॥

मुसलः अन्यदीयः मुसलायुधम् येन हेतीशमुसलेन, **अतिक्षोदशालित्वम्** अत्यन्तं चूर्णशालित्वम् अत्यन्तं चूर्णीभावमित्यर्थः **याति** प्राप्नोति। **तेन हेतीशमुसलेन** सुदर्शनमुसलायुधेन **नः** अस्माकम् **मोहमौसलम्** मोह एव अज्ञान एव मौसलम् मुसलः मुसलमेव मौसलमिति स्वार्थेऽण्। **आशु** द्रुतम्, **भिद्यताम्** भज्यताम्। रूपकम् आशीश्च॥ १६॥

अथ तस्य शूलशीलं श्लाघते— **शूलीति।**

शूलिदृष्टमनोर्वाच्यः येन शूलयति द्विषः।
भवतां तेन भवतात् त्रिशूलेन विशूलिता॥ १७॥

शूलिदृष्टमनोः शूलिना शिवेन **दृष्टस्य** अध्यक्षितस्य, **मनोः** मन्त्रस्य, रामतारकमन्त्रस्येत्यर्थः। तथा चोक्तम्

'हरेरष्टाक्षरात् रेफं शिवपञ्चाक्षराच्च मम्।
आदाय तारकं चक्रे रामनाम सदाशिवः॥'

इति। तथा च **श्रीमन्महाभारते—**

'श्रीराम राम रामेति रमे रामे मनोरमे'

इति। **वाच्यः** अभिधेयः श्रीरामभद्र इत्यर्थः। **येन** त्रिशूलेन **द्विषः** शत्रून् शूलयति व्यथयति, तेन त्रिशूलेन त्रिशिखेन शूलायुधेन **भवताम्** युष्माकम् **विशूलिता** नीरोगता 'शूलोऽस्त्री रोग आयुधे' इति मेदिनी। **भवतात्** भूयात्। अत्र स्वासाधारणरूपेण रामत्वादिना व्यङ्ग्यस्यैव भगवतः शूलिदृष्टमनुवाच्यत्वरूपेण भङ्ग्यन्तरेण कथनात् पर्यायोक्तमलंकारः। तथा च सूत्रम्—**'गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम्'** इति॥ १७॥

एवं तस्यायुधान्यभिवर्ण्य तादृशायुधवरिवसितात् **'स्मृत्यैव स्वानुरक्तानां दृष्ट्वा दृष्टार्थसाधकम्। स्वभक्तप्रत्यनीकानां मारणं सुरपूजितम्॥'** इत्युक्त-

रीत्या स्वाश्रितजनसंरक्षकात् भगवतो वासुदेवस्य संकल्परूपात् सुदर्शनात् भुवनरक्षां प्रार्थयते—**अस्त्रग्रामस्येति।**

अस्त्रग्रामस्य कृत्स्नस्य प्रसूतिं यं प्रचक्षते।
सोऽव्यात् सुदर्शनो विश्वमायुधैःषोडशायुधैः॥ १८॥

यम् सुदर्शनम्। **कृत्स्नस्य** समस्तस्य। **अस्त्रग्रामस्य** शस्त्रास्त्रवर्गस्य। **प्रसूतिम्** उत्पत्तिस्थानम्। **प्रचक्षते** प्रब्रुवन्ति। **सः** तादृशमहिमा षोडशायुधः षोडशायुधानि यस्य सः चक्रादिषोडशायुधधर इत्यर्थः। **सुदर्शनः** सुदर्शनपुरुषः। विश्वम् समस्तं भुवनम्। **आयुधैः** चक्रादिभिर्वर्णितगुणैः। **अव्यात्** अवतु। आशीः॥ १८॥

अथैवमाचार्यः साधुपरित्राणार्थं हेतिराजतदायुधविषयकं स्तोत्रं परिसमाप्यास्याः स्तुतेः सकलश्रेयःप्रदत्वं द्योतयन् स्वकीर्त्यनुवृत्तये स्वग्रन्थनाम स्वनामचोपनिबध्नन् ग्रन्थमुपसंहरति-**श्रीमदिति।**

श्रीमद्वेङ्कटनाथेन श्रेयसे भूयसे सताम्।
कृतेयमायुधेन्द्रस्य षोडशायुधसंस्तुतिः॥ १९॥

श्रीमद्वेङ्कटनाथेन श्रीमता विद्यासंपद्वता श्रीमदाचार्यानुग्रहाधिगतनिरवद्यवाग्विलासशालिनेत्यर्थः। एतादृशानुग्रहपात्रतया स्वस्मिन् श्रीमच्छब्दप्रयोगः। तथाचार्यैरेव—

'व्यातानीत् वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा' इति।
'श्रीमद्भ्यां स्यादसावित्यनुपधिवरदाचार्यरामानुजाभ्यां

सम्यग्दृष्टेन' इति च बहुधा प्रपञ्चितम्। **वेङ्कटनाथेन** श्रीवेङ्कटेशघण्टावताररूपत्वात् तत्तीर्थदिनाविर्भावत्वाच्च वेङ्कटनाथ इति स्वकीयपितृकृततदीयदिव्यनामधेयेनेत्यर्थः। मयेति शेषः। **सताम्** श्रीमद्गृध्रसरस्तीरनिवासिनां साधूनाम्। **भूयसे** भूरितराय। **श्रेयसे** क्षेमाय, शीतज्वरनिरासायेत्यर्थः। **आयुधेन्द्रस्य** हेतिराजस्य। **षोडशायुधसंस्तुतिः** चक्रादिषोडशसंख्याकायुधस्तवः। **कृता** विरचिता आसीदिति शेषः॥ १९॥

एकोऽयं द्विस्स्वभावस्त्रिनयनललितस्सच्चतुर्वर्गदाता
नित्योद्यत्पञ्चकृत्यष्षडरमधिवसन् सप्तहेत्यायुधोग्रः ।
अष्टप्रोद्दामबाहुर्नवमिहिरनिभः कृष्यहेत्यग्रणीर्नः
प्रत्यालीढेन तिष्ठन् दशशतगुणितां संपदं सौतु नित्यम् ॥

वेदान्तलक्ष्मणमुनेः पादाम्बुरुहरेणुना ।
विवृता राजगोपेन षोडशायुधसंस्तुतिः ॥

इति नावल्पाकं श्रीमद्वेदान्तरामानुजसंयमि-
सार्वभौमकरुणाकटाक्षलवोल्लसितसत्ता-
केन तेन्बरै श्रीराजगोपालाचार्येण
कृतं षोडशायुधस्तुतिव्याख्यानं
संपूर्णम् ।
श्रीमते निगमान्तमहादेशिकाय नमः ॥

सुदर्शनाष्टकश्लोकपादसूची

	पृष्ठम्	श्लोकः
अमरदृष्ट	८	८
अमितविष्वक्	६	५
जगदवस्थान	१	१
जगदविद्या	८	८
जनितमिस्रा	८	८
जनिभयस्थान	१	१
जय जय श्रीसुदर्शन	१/१, ३/२, ४/३, ५/४, ६/५, ६/६, ७/७, ८/८	
दनुजविद्या	८	८
दनुजविस्तार	८	८
दृढदयायन्त्र	७	७
द्विचतुष्कमिदं	८	९
न विहन्येत	८	९
निखिलदुष्कर्म	१	१
निखिलशक्ते	५	५
निगमनिर्व्यूढ	४	३
निगमसद्धर्म	१	

निजपदप्रीत	४	३
निजपरव्यूह	४	३
निरवधिस्फीत	४	३
निरवधिस्वादु	५	५
पटुतरप्रज्ञ	५	४
पठतां वेङ्कटनायक	८	९
परिगतप्रत्न	५	४
परिजनत्राण	५	४
पृथुतरज्वाल	५	४
पृथुमहाहेति	७	७
प्रतिमुखालीढ	७	७
प्रतिभटश्रेणि	१	१
प्रथितविद्वत्	३	२
प्रहरणग्राम	५	४
भजदहिर्बुध्न्य	३	२
भुवननेत्र	५	५
महितसंपत्	६	६
वरगुणस्तोम	१	१
विकटमाला	७	७
विबुधसङ्कल्प	६	६
विविधमाया	७	७
विविधसंकल्प	६	६

विहितसंपत्	६	६
विषमेऽपि	८	९
शतपथब्रह्म	३	२
शतमखब्रह्म	३	२
शमितविष्वक्	६	५
शुभजगद्रूप	३	२
षडरचक्र	६	६
सकलतत्त्व	६	६
समरजुष्ट	८	८
सवनतेजः	५	५
सुरजनत्रास	३	२
स्थिरमहायन्त्र	७	७
स्फुटतटिज्जाल	५	४
हरपुरप्लोष	४	३
हरिहयद्वेषि	४	३

सुदर्शनाष्टकव्याख्यायां प्रमाणतयोद्धृतानां ग्रन्थ-तत्कर्तृवचनानां सूची

	पृष्ठम्	पङ्क्तिः
अक्षरं तु मोक्षेऽपि	७	१
अन्ये	३	१२
अमरः	५	१५
"	७	१
अहिर्बुध्न्यसंहितायां	६	१०
आलीढविशेषशोभिने	७	२१
आलीढन्तु ततोऽग्रतः	७	१७
आशीर्नामाभिलषिते	३	९
इच्छागृहीत	५	१७
एकं लोकस्य चक्षुः	६	४
केचित्	३	१२
चक्षुर्देवानामुत	६	४
चमूषच्छ्येन	४	१
ज्वालकीला	५	१५
ज्ञानमेव परं रूपं	६	८
तदा तु चक्रमित्याहुः	६	९
तवानन्तगुणस्यापि	४	१३

त्रिलोकरक्षी महिमा	७	४
दक्षिणे वाममाकुञ्च्य	७	१८
निज आत्मीयनित्ययोः	४	२०
नित्ये वन्येव काशी	५	५
पवित्रमित्यग्निः	४	१
पवित्रं ते विततं	३	२५
पुरा हि भूमेर्निरासाय	४	२३
बन्धूरबन्धुरौ रम्ये	७	१९
माया स्याच्छाम्बरी बुद्ध्योः	७	२३
मेदिनी (कोशः)	७	२४
यः पृथिव्यां तिष्ठन्	७	७
यस्मिन् विन्यस्य	२	२२
रघुवंशोक्तेः	७	२१
रभसः	७	२०
वर्णसाम्यमनुप्रास	३	४
वसन्ततिलकवृत्तम्	८	२५
विश्वः	४	२०
विषमे ससजा गुरू	९	१
व्यूहस्तेजोऽभिमानी	४	१५
श्रुतिः	३	२५
श्रुतेः	६	४
	७	८

षोडशायुधस्तोत्रश्लोकानां पादसूची

	पृ.	श्लो.
अकुण्ठशक्ति: सा शक्ति:	१६	९
अनङ्कुशविहारो न:	१४	६
अनन्यान्वयभक्तानां	१४	६
अविद्यां स्वप्रकाशेन	१५	८
अव्यात् हेतीशवज्रोऽयं	१८	१४
अव्यान्नश्चक्ररूपस्य	१६	११
अशक्तिं वारयेत न:	१६	९
अस्त्रग्रामस्य कृत्स्नस्य	२१	१८
अस्माकं दण्डयेद्द्विष:	१४	५
आमनन्त्यक्षसायकम्	१६	११
आयुधानामहं वज्रं	१८	१४
आयुधेन्द्रेण येनैव	१७	१२
आयुधैरायुधेश्वर:	११	१
आयुधैष्षोडशायुधै:	२१	१८
इत्यगीयत यस्स न:	१८	१४
कालचक्रं च शाश्वतम्	१२	२

कृतेयमायुधेन्द्रस्य	२१	१९
क्रियाशक्तिगुणो विष्णो:	१६	९
चक्ररूपस्य चक्रिण:	१२	२
जुषतां न: पर: पुमान्	११	१
जुष्ट: षोडशभिर्दिव्यै:	११	१
तद्धनुश्शार्ङ्गधन्वन:	१६	११
तारत्वं यस्य संस्थाने	१६	१०
त्रिशूलेन त्रिशूलिता	२०	१७
दण्ड्यानां येन दण्डनम्	१४	५
दधीच्यस्थिसमुद्भव:	१८	१४
दैत्यदानवमुख्यानां	१४	५
नासीरविजयोऽस्तु न:	१८	१३
परशु: परिपातु न:	१३	३
पाञ्चजन्य: स पातु: न:	१६	१०
पातु नस्तत्परं चक्रं	१२	२
पातु हेतीश्वराङ्कुश:	१४	६
पाश: पाशविमोचनम्	१७	१२
प्रभो: प्रहरणेन्द्रस्य	१६	१०
प्रसूतिं यं प्रचक्षते	२१	१८
भयप्रशमनी गदा	१९	१५
भवतां तेन भवतात्	२०	१७
भिद्यतां मोहमौसलम्	२०	१६

मुसलो येन तेन नः	२०	१६
यत्रसूतिशतैरासन्	१३	३
यत्र पापानि देहिनां	१५	७
यदायत्तं जगच्चक्रं	१२	२
यस्मिन् दैत्यास्समुद्धृते	१३	४
ये सात्त्विकमहङ्कारं	१६	११
यात्यतिक्षोदशालित्वं	२०	१६
येन शूलयति द्विषः	२०	१७
यो भवत्यतिशक्तिमान्	१६	९
रुद्राः परशुलाञ्छनाः	१३	३
रुन्धन्नाशामतङ्गजान्	१४	६
विद्यारूपः छिनत्ति यः	१५	८
विश्रुता बुद्धिरूपिणी	१९	१५
विश्वक्षेत्रकृषीवलः	१८	१३
विश्वसर्गो विमुच्यते	१७	१२
विश्वसंहतशक्तिर्या	१९	१५
विहारो येन देवस्य	१८	१३
व्यज्यतेऽनेन सीरेण	१८	१३
शकुन्ता इव धावन्ति	१३	४
शब्दे च परिदृश्यते	१६	१०
शूलिदृष्टमनोर्वाच्यः	२०	१७
श्रीमद्वेङ्कटनाथेन	२१	१९

श्रेयसे भूयसे सताम्	२१	१९
षोडशायुधसंस्तुतिः	२१	१९
स कुन्तः पालयेत नः	१३	४
स दिव्यो हेतिराजस्य	१३	३
स नः सौदर्शनः कुर्यात्	१७	१२
स पातु शतवक्त्राग्निः	१५	७
स सुदर्शनिस्त्रिंशः	१५	८
संभूय शलाभायन्ते	१५	७
सा नस्सौदर्शिनी भूयात्	१९	१५
सोऽव्यात् सुदर्शनो विश्वं	२१	१८
सौतु नस्तत्त्वदर्शनम्	१५	८
स्वसङ्कल्पकलाकल्पैः	११	१
हेतिदण्डेशदण्डोऽसौ	१४	५
हेतिर्हेतीश्वरस्य नः	१५	७
हेतीशमुसलेनाशु	२०	१६
हेलया हेतिराजेन	१३	४

षोडशायुधस्तोत्रव्याख्याने प्रमाणतयोपात्तानां ग्रन्थ-तत्कर्तृवचनानां सूची

	पृष्ठम्	पङ्क्तिः
अभिप्रियाणि	१०	१८
अभियुक्तैः	१६	३
अमरः	११	९
अव्यक्तादिविशेषान्तैः	१२	२२
अस्ति भवन्ति	१३	१
अहिर्बुध्न्यसंहितायां	१२	१५
आचार्यदण्डिना	११	१०
आचार्याः	१८	१८
आचार्यैः	२१	१६
आथर्वणस्य	१८	२२
आदाय तारकं	२०	१५
आशीर्नामाभिलषिते	१३	८
इन्द्रो दधीचोऽस्थिभिः	१८	२१
इत्येव नित्यसमासो	१३	२६
ईषदसमाप्तौ	११	९
उदात्तं वस्तुनः	१९	१३
उद्देश्यप्रतिनिर्देश्ययोः	१६	३

उपमायामिमे प्रोक्ताः	११	१३
एक एव दितेः पुत्रः	१४	७
एकस्याप्यसकृत्परः	१२	२
कला तु षोडशो भागः	११	८
कल्पदेशीयदेश्यादि	११	११
काव्यं यशसे	१०	२०
काव्यालापांश्च	१०	२२
केदारेण	१२	१०
कोशः	१८	९
गम्यस्यापि	२०	२२
गीताचार्येण	१८	१९
चक्रं कुन्तं कृपाणं	११	१६
चतुर्विंशतिसंख्यातैः	१२	२३
चत्वारिंशद्दनोः पुत्राः	१४	८
जगच्चक्रमिति	१२	२४
तस्य चानुकरोतीति	११	१२
तेषां प्रथमजो राजा	१४	९
त्रिनाभियुक्तं	१२	१७
दण्डापूपिकया	१३	२५
दण्डोऽस्त्री दमहिंसा	१४	११
नानार्थरत्नमालयां	१४	११
नियतानां सकृद्धर्मः	१६	१९

नियतारोपणोपायः	१८	११
परश्शतं वाऽपि	१०	२३
पराशरः	१७	५
परिवर्तयते देवः	१२	२०
पाञ्चरात्रे	१५	११
पुराणरत्ने	१५	१६
बिभर्ति यच्चासि	१५	१७
बिभर्ति शङ्खरूपेण	१७	७
बुद्धिः मनस्तत्त्वम्	१९	२१
बुद्धिरध्यास्ते	१९	२०
ब्रह्ममयेन कम्बुना	१६	१५
भूतादिमिन्द्रियादिं च	१७	६
महाभारते	१४	७
"	२०	१६
मेदिनी	२०	२०
यानीन्द्रियाणि	१७	८
युजोर्ज्येन सरिद्भर्तुः	१२	१०
योऽभ्युदयं पयः	१२	९
वार्तिकात्	१३	२६
विद्यामयं तु	१५	१८
व्याख्यातारः	१९	२१
व्यातानीत् वेङ्कटेशो	२१	१७

शतं सहस्रमयुतं	१३	१४
शररूपाण्यशेषाणि	१७	९
शाट्यायनिनः	१८	२२
शूलोऽस्त्री रोग	२०	२०
शैत्यं हि यत्सा	१७	३
श्रीभागवते	१६	१५
श्रीमद्भ्यां स्यादसौ	२१	१८
श्रीराम रामेति	२०	१७
श्रीविष्णुपुराणे	१९	२०
श्रुतिः	१८	२१
श्रुत्या	१०	१९
सद्यः परनिर्वृतये	१०	२१
संवत्सरभयं	१२	१८
सूत्रम्	१३	२४
"	२०	२२
सेनामुखं तु नासीरं	१८	८
सेष्टा संसृष्टिरेतेषां	१२	७
सोऽनेकस्य सकृत्	१२	५
स्फुटमेकत्र विषये	१२	४
स्मृत्यैव स्वानुरक्तानां	२०	२४
स्वभक्तप्रत्यनीकानां	२०	२५
हरेरष्टाक्षरात्	२०	१.४